राष्ट्रिय संस्कृत संस्थानम्
नवदेहली

गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठ ग्रन्थमाला

॥२॥

वाणीविलसितम्

सम्पादकौ
किशोरनाथ झा - जगन्नाथ पाठकः

योऽनूचानः स नो महान्
राष्ट्रियसंस्कृतसंस्थानम्

Rashtriya Sanskrit Sansthan

(Under the auspices of the Ministry of Education and Social Welfare, Govt. of India)

New Delhi

Ganganatha Jha
Kendriya Sanskrit Vidyapitha
TEXT SERIES

General Editor

Dr. G. C. Tripathi

No. 1

VĀṆĪVILASITAM

(An anthology of Sanskrit poems of 19 contemporary poets)

Edited by

Dr. Kishora Nath Jha   Dr. Jagannath Pathak

ALLAHABAD
1978

राष्ट्रियसंस्कृतसंस्थानम्
(केन्द्रीयशिक्षामन्त्रालयस्याङ्गभूतम्)
नव देहली

—**—

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला
प्रधानसम्पादकः
गयाचरण त्रिपाठी

—**—

प्रथमं प्रसूनम्

वाणीविलसितम्

सम्पादकौ
किशोरनाथ झा — जगन्नाथ पाठकः

—**—

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
मोतीलाल नेहरू पार्क
प्रयागः-२

वाणीविलसितम्

वाराणसीप्रयागमण्डलयोः कतिपयविशिष्टसंस्कृतकवीनां
प्रतिनिधिपद्यानां सङ्कलनम्

सम्पादकौ

डा० किशोरनाथ झा — डा० जगन्नाथ पाठकः

★

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
मोतीलाल नेहरू पार्क
प्रयागः-२

१९७८

प्रकाशकः
डा० गयाचरण त्रिपाठी
प्राचार्यः,
गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
मोतीलाल नेहरू पार्क
इलाहाबाद-२११००२

मूल्यम्

मुद्रकः
शाकुन्तल मुद्रणालय
३४, बलरामपुर हाउस
इलाहाबाद

प्रकाशकीयम्

वसन्तपञ्चम्याः पुण्यपर्व चिरकालादेव वाग्देव्याः समुपासनेन संबद्धम् । भारतमण्डलेऽस्माकं सर्वत्रैवास्मिन् दिने सकलाः सारस्वताः सुधियः स्तुतिसुमनोभिः सरस्वतीं समर्चयन्तः समुल्लसिताः। अस्मिन्नेवावसरे गतवत्सरे वागलङ्कारभूतानां कतिचिद्विशिष्टकवीनां वागमृतरूपनैवेद्येन वीणापाणेर्वरिवस्यां विधातुं विद्यापीठेऽस्मिन् विहितोऽस्माभिः प्रयत्नः। अस्माकमामन्त्रणं प्राप्य प्रयागवाराणसीमण्डलयोर्विंशतिप्रायाः कवयोऽत्रागत्यास्मानाभारभरितांश्च विधाय स्ववाङ्माधुरीरसभरेण सहृदयचेतांसि समाप्लावयन्तो, मन्ये, प्रयागे चिरादन्तःसलिलां लोकादर्शनगतां सरस्वतीं पुनरप्युद्भावयामासुः।

तमिमं तेषां काव्यरसमनेकेषां तत्रानुपस्थितकाव्यमधुचुञ्चुमधुपानामाग्रहभरेण प्राकाश्यमुपनीय भवादृक्षाणां सहृदयहर्यक्षाणां समक्षमुपस्थापयन्तो भृशं मोदामहे वयम्। अनुभवन्तु भवन्तो नूनमेतत्काव्यरसाम्बुधिनिमज्जनसुखम्। 'कविः करोति काव्यानि रसं जानन्ति पण्डिता' इति न्यायेन कियती लावण्यवती मधुरा चैषा कविताकामिनीत्येतस्य निर्णेतारस्तु भवन्त एव। वयं तु सर्वथाऽऽशास्महे यत् तस्यैतस्या जरत्याश्चिरंट्याश्चापि संस्कृतकाव्यवधूट्या माधुर्यं लावण्यं चाभिलक्ष्यावश्यमेव भवतां हृदि हर्षपुलको जनिष्यते—कं वा सहृदयरसिकं न मोहयन्ति लोके वनिताविलासाः!

अनेनापि वाग्वनिताविलासभूतेन वाणीविलसितेन भवन्त आविद्धहृदया भविष्यन्तीति नास्ति काऽपि संशीतिर्यतो हि—

सुभाषितेन गीतेन युवतीनां च लीलया।
मनो न भिद्यते यस्य स योगी ह्यथवा पशुः॥

इति किमधिकं सहृदयवर्येषु

विदुषामाश्रवः
गयाचरणस्त्रिपाठी
प्राचार्यः
गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्

प्रयागः
पौष कृष्ण द्वादशी
सं० २०३५

—००—

पुरोवाक्

वसन्तमहोत्सवस्याङ्गतया संस्कृतकविसम्मेलनमेकमस्माकं विद्यापीठे २०३४ तमे वैक्रमाब्दे वसन्तपञ्चम्यां समायोजितमभूत् । तत्रास्माकमभ्यर्थनामूरीकृत्य कतिपये वाराणसेयाः प्रयागस्थाश्च गीर्वाणवाण्याः समुदिताः समुदीयमानाश्च सुकवयः सम्मिलिताः । सम्मेलनस्याध्यक्षपदमलमकुर्वन् आचार्यप्रियव्रतशर्माणः काशीहिन्दूविश्वविद्यालयीयाः । विद्यापीठस्यास्य प्राध्यापकाः डा० जगन्नाथपाठका आयोजकत्वमगृह्णन् । सम्मेलनस्य साफल्यं, श्रावितरचनानां संस्कृतकाव्यजगतः सामयिकीं प्रतिनिधिरूपतां च विगणय्य 'काव्यसंग्रह'रूपेण एतासां प्रकाशनं विधाय, अन्येऽपि काव्यरसगृध्नवोऽस्माभिस्तर्पयितव्या इति नैके समुपस्थिताः सहृदयाः साग्रहमस्मानन्वरुन्धन् ।

कालक्रमेण स एव विचारः सचेतोभिरस्माकं प्राचार्यवर्यैरिदानीं क्रियारूपतां सम्पाद्यमानः 'वाणीविलसिता'ख्येनानेन काव्यसंग्रहरूपेण परिणतो विदुषां सहृदयानां च समक्षं सहर्षं प्रस्तूयते । कविसम्मेलने तिस्रो याः समस्याः पूर्त्यर्थं प्रदत्ताः, तास्चासन् 'न प्रबुद्धां न सुप्ताम्' 'किं चिन्त्यते' 'वाणीविलसितम्' चेति ।

अद्यत्वे वैज्ञानिकानां नानाबुद्धिकौशलजनितेन चमत्कारेणामूलचूलं विपर्यस्ते सकलजगन्मानसे यद्यपि कवितायास्तपस्विन्याः कृते नादरास्पदं किमपि स्थानं सन्दृश्यते, यस्य तस्यां यः कश्चिद् अभिनिवेशः सोऽपि पुराणं नवं वा काव्यं श्रोतुमवकाशमेव न लभते, तत्रापि गीर्वाण-

वाण्यां कवयतां स्थितिरत्यन्तं शोचनीया, तथापि नास्त्यत्र संशीतिलवो यदस्यां यत्र कुत्रापि स्थाने यस्मिन् कस्मिन्नपि काले नवनवोन्मेषशालिन्याः समुल्लसितसारस्वतप्रसादसञ्जनितायाः प्रतिभायाः समुदयोऽभवद् भवति भविष्यति च । अत एवेदानीं सर्वत्र प्रायः प्रचुराणां सहृदयानां लाभाभावेऽपि गीर्वाणवाण्यां काव्यनिर्माणं प्रति प्रतिभावतां प्रवृत्तिर्नैरन्तर्येण समभिलक्ष्यते । केन्द्रे राज्येषु चैवंविधप्रवृत्तिशालिनो महाभागा यथावसरं शासनेन पुरस्कारादिप्रदानेनोत्साहान्विता विधीयन्त इति सुखकरम् । किन्तु नैतावतैव सन्तोषो विधेयः । सर्वैरेव संस्कृताभ्युत्थानपरैः संस्थानैरिह दत्तावधानैस्तथा प्रयतितव्यं यथास्यां भाषायां भारतम् एकस्मिन् सूत्रे निबद्धुं शक्येत, साहित्यस्य उत्तरोत्तरमभिवृद्धिश्च स्यात् । युगेऽस्मिन्नाधुनिकानां संस्कृतकवीनामुत्साहसंवर्धनार्थं बहु विधातव्यं परिलक्ष्यते । कदाचिदेष्वेव कश्चन कालिदासः कश्चन भवभूतिर्बाणभट्टो वा प्रकटीभवेत् । अनेन पथा किञ्चिद् विमृशद्भिरस्माभिः प्रविधीयमानोऽयमध्यवसायः कियान् सफलः कियान् वा विफल इति सदसद्विमृष्टिविचक्षणाः सन्त एव प्रमाणम् ।

सङ्कलनेऽस्मिन् न केवलं रचनानां वैविध्यमपि तु प्रवर्तमानायां परिस्थितौ भङ्ग्यन्तरेण परिहासाद्याधुनिकविषयजातमपि समाकलयितुं शक्यते । एते हि संस्कृतस्याधुनिकाः कवयो भामहादिनिर्दिष्टमार्गानुधावनं सर्वथा परित्यज्य नूतना भङ्गीभणितीरप्युन्नेतुं सरलतया प्रभवन्तीत्यत्र सङ्कलनमेतत् प्रमाणम् । प्राचीनाचार्यवर्यान् प्रति सुमहत्या श्रद्धया भरिता अपि वागभिधानादिपद्धतावमी सुतरां प्रगल्भन्ते । पुरातने काले संस्कृतकवयः प्रायः परम्परया प्रतिबद्धा राज्ञां स्तुतौ शृङ्गारप्रचुरां कविताकामिनीमलङ्कारभारैरवनतां विदधन्त आसन् । अतएव लोकेषु बद्धमूलतां गता धारणा यत्, न भवन्ति संस्कृतकाव्येषु तात्कालिक्यः सामाजिकपरिस्थितयः प्रतिफलिता इति । यतो ह्येते राजनीत्याद्याधुनिकेभ्यो विषयेभ्यो विमुखाः परम्परानुगामिन एव लक्ष्यन्ते । एतादृशीं

धारणामपाकर्तुमेतत् संकलनं दृढं क्षमेतेति मदीयो विश्वासः। तथाहि कविसम्मेलनस्याध्यक्ष्यमाचरद्भिः प्रियव्रतशर्मभिरिह दलयोर्विभक्तं कांग्रेस इत्याख्यं जनतादलं चाभिलक्ष्य 'किं चिन्त्यते' इति समस्यापूर्तिव्याजेन तात्कालिकी स्थितिर्वर्णिता—

गावस्ते मुषितास्तु वत्ससहिताः कांग्रेसरेड्डीजनै-
र्गान्धीपक्षधरैरुभौ तव बलीवर्दौ च संयाचितौ।
सीरस्ते जनतादलेन सुचिरं स्कन्धेन धुर्यौ धृतौ
गार्हस्थ्यं कृषिमन्त्रिणाभ्युपगतं हे गोपं किं चिन्त्यते' ॥

अथ च हृदयावर्जनीभ्यो लोकगीतिसंगीतलहरीभ्यः प्रेरणामासाद्य संस्कृतस्येदानीन्तनाः कवयः संस्कृतगीतानि रचयन्तीत्यप्यालोकितमस्माभिः।

सत्यप्याधुनिकसंस्कृतकवीनां स्वे स्वे क्षेत्रे महीयस्यामुपलब्धौ साफल्ये च सुबहु कर्तव्यमवशिष्यते। अतः स्वसाफल्येन तृप्तिमनुभूय शिथिलैस्तैर्न भाव्यम्। सर्वतः पूर्वं स्वकीयस्य देशस्य विविधसमस्यानां सूक्ष्मेक्षिकया समाकलनं विधेयम्। समग्रस्य मानवस्य 'सत्यं' 'शिवं' 'सुन्दरम्' समानभावनयाऽभिलक्ष्य रमणीयेऽभिनवे च निर्माणे प्रयत्नो विधेयः। महाकविना श्रीरवीन्द्रनाथेन 'विश्वमेकनीडम्' इति यथा परिकल्पना कृता तथैव क्षुद्राणां सीमितविचाराणां परित्यागो विधेयः। प्रयत्नेऽस्मिन् यदि वा प्राचीना काचिदभिधानमर्यादा परित्यज्येत ततस्तैः—

घनाम्बुना राजपथे हि पिच्छिले
क्वचिद् बुधैरप्यपथेन गम्यते।

इति श्रीहर्षनिर्दिष्टदिशा गतानुगतिकतां परित्यज्य स्वेनैव नवीनः पन्थाः परिकर्षणीयः।

सन्त्यत्र मदीयकातज्ञ्यभाजनानि ते सारस्वता बान्धवा येषां कतिपय-रचना 'वाणीविलसितम्' इत्याख्येऽस्मिन् संकलने संगृहीताः। कविक्रम-निर्देशप्रसङ्गे समायाते विविधविधे परामर्शे नाम्न आद्यक्षरानुक्रम एव वरिष्ठैः सुधीभिर्निर्णीत इति स एवात्र क्रमः स्वीकृतः। आशास्महे, अभिनवस्य संकलनस्यास्य सहृदयानां समाजे समादरो भवितेति। याः काश्चन सम्पादने त्रुटयस्ताः सुधीभिः सदयहृदयैः क्षन्तव्याः, यथासमयं च संकलनविषये स्वकीयमभिमतं विलिख्यानुग्राह्योऽहमिति शम्।

विदुषां विधेयः

किशोरनाथ झा

व्याख्याता

गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्,

प्रयागः।

वाणीविलसितम्

अनुक्रमणिका

वाग्वन्दनम्

मान्दीतमोऽपनयना नयनाभिरामा
रामा रमारमणनाभिसरोजभूतेः ।
भूतेर्गिरां वितरणे तरणे सहाया
ऽद्दायार्णवे च भवताद् भवतापनुत्त्यै ॥

—[स्व०] रामशरणशास्त्रिणः*

* 'कौमुदीकथाकल्लोलिनी' 'ब्रह्मसूत्रभाष्यपञ्चकसमीक्षणम्' प्रभृति विविधवैदुष्यपूर्णग्रन्थकर्तारो व्याकरणे दर्शनशास्त्रे चावाधितगतय इमे आगरा विश्वविद्यालयस्य मुरादावादस्थ—के० जी० के० कालेजप्रभृतिमहाविद्यालयेषु संस्कृताध्यापनं कुर्वन्तो बहुशो लालित्यपूर्णानि विशेषतो भगवत्भक्तिपरकाणि पदानि विरचयामासुः । स्वकीयजीवनस्य सान्ध्यवेलायां प्रयागे निवसन्तस्ते विद्यापीठमिदं नैकेषु अवसरेषु भाषणाविप्रदानेन कृतार्थीचक्रुः ।

हृदि ब्रह्मानन्दास्वदनमिव यत् सिञ्चति रसा-


नमन्दानन्दौघैस्तृणयति च सर्वेन्द्रियसुखम् ।

प्रयागस्यैतस्मिन् पुरमथनपुर्याश्च ललितं

जयेद् विद्यापीठे निपुणकविवाणीविलसितम् ॥

—प्राचार्यस्य स्वागतभाषणात्

गोविन्द पाण्डेयः



जन्मतिथिः (१५-१०-१९३८ ई०) विक्रम संवत् १९९५, ग्रा० पो० जनता जरीडीह (वाया, पलौंजिया) गिरिडीह (हजारीबाग) विहार।

काशीहिन्दूनिश्वविद्यालयाल्लब्ध-साहित्यशास्त्राचार्यपदवीकास्तत एव च चक्रवर्तीत्युपाधिविभूषित्ताः श्री-पाण्डेया इदानीं वाराणस्यां साधु-बेलासंस्कृतमहाविद्यालये साहित्य-विभागस्याध्यक्षाः सन्ति । अनेन कवितार्किकचक्रवर्तिनां पण्डित महादेवशास्त्रिवर्याणां श्रीचरणयोः साहित्यशास्त्रमधीतम् । व्याकरणाद्यन्य-शास्त्रेष्वपि लब्धगतय इमे संस्कृतकाव्यनिर्माणेन शनैः शनैर्वाराणस्यामितरेष्वपि स्थानेषु प्रसरद्यशसः सन्ति । 'श्रीनीलकण्ठशतकम्' नाम काव्यमेतेषां प्रकाशितं वर्तते । 'दधीचिवृत्तम्' नाम महाकाव्यं सम्प्रत्येषां निर्माणाधीनम् । सरला स्वाभाविकी प्रसादगुणकलिता च रचना सर्वतोभावेनोपनिबद्ध्यते पाण्डेय-महाशयैः । यद्यपि संस्कृतस्यालङ्कारप्रधानकाव्यानां सम्यक् प्रभावः समाकलयितुं शक्यत एतेषां पद्येषु तथापि क्वचिदप्यलङ्कारादियोजनायां नैतेषामभिलक्ष्यते पृथक् प्रयत्नः । यथा साहित्ये तथैव संगीतेऽप्येतेषामभिरुचिर्नैसर्गिकी ।

वाणीस्तुतिः

मृणालबुद्ध्या स्फटिकाक्षमाला—
मादातुमुद्ग्रीवतमं मरालम् ।
प्रवालदण्डेन निवारयन्तीं
वागीश्वरीं नौमि वचोऽधिगन्तुम् ॥१॥

सकलां सकलाश्रितां दया—
मनिशं सन्दधतीमकारणम् ।
परमां परमां शुभङ्करीं
जननीं स्तौमि सरस्वतीमहम् ॥२॥

श्रीशारदां हृतमदां मतिदामभेदां
वेदाद्यवेद्यमहिमानमगम्यरूपाम् ।
भव्यां भवादिरहितां रमणीयरामां
सच्चित्सुखां शरणदां समुपाश्रयेऽहम् ॥३॥

ध्वान्ताध्वनि स्खलदलं नृकुलं नितान्तं
प्रज्ञापथं ज्वलदनन्यरुचा नयन्तीम् ।
त्रैलोक्यवन्दितपदां प्रतिभाविभूषां
श्रीशारदां वयमहो जननीं स्मरामः ॥४॥

गोविन्द पाण्डेय:

जगज्जन्यानल्पान्तकसमविपज्जालगहना—
नलज्वालामालोद्गतविषमदाहैः कवलितम् ।
प्रपन्नानां वृन्दे क्षणममृतवृष्टिं विदधती
क्वणन्ती तन्त्रीं या सरसयति तां नौमि जननीम् ॥५॥

समस्यापूर्तयः

आम्रद्रूणां विकचकलिकास्वादमाद्यत्पिकानां
स्वाने मर्मप्रहरणपटौ प्रोषितस्त्रीजनानाम् ।
ध्वान्ते विष्वङ्मलयपवने गुञ्जिते चालिवर्गैः
प्रेक्षस्वोत्कां सखि विरहिणीं न प्रबुद्धां न सुप्ताम् ॥६॥

कश्चित् स्वीयां नवपरिणयां प्रेयसीं सङ्गमोत्कां
स्वैरापाङ्गामवनतमुखीं प्राप्य विद्युत्प्रतीकाम् ।
आरात्रं तां विरहमिलनद्वन्द्वजुष्टां सकम्पां
प्रेयान्पश्यन् प्रमुदमयते न प्रबुद्धां न सुप्ताम् ॥७॥

दस्यूनामनियन्त्रितं प्रतिदिनं जातं महोपप्लवं
सर्वत्रानयसम्भ्रलं नयवतामुत्कोचसम्वर्द्धितम् ।
स्वैराचारमरुन्तुदश्च विततं सम्प्रत्यहो स्वैरिणां
दर्शं दर्शमिहस्थितोन्नतपदारूढैश्च किं चिन्त्यते ॥८॥

यत्राध्यात्मिकमुत्तमं विनिहितं ज्ञानं गुरुत्वास्पदं
येनाचारपरम्परा हितवहा सम्बोध्यतेऽहर्निशम् ।
राज्ञां नीतिमताञ्च नीतिरमला येनोपदिष्टा स्फुटं
तद्गीर्वाणवचोऽभिरक्षणकृते तज्ज्ञैश्च किं चिन्त्यते ॥९॥

वाणीविलसितम्

चेतोहारिगुणाश्रितामनुपमां सद्वृत्तभावोज्ज्वलां
यामासेव्य सुभूषणान्वितपदां प्रौढां रसस्यन्दिनीम् ।
निर्वृत्तिं परमां गतेन भवता तां संस्कृतां भारतीं
खिन्नां लोकयता तदर्थमधुना सद्यो न किं चिन्त्यते ॥१०॥

अतिक्रम्यादित्यं विदितगतिकं सूक्तिसुभगं
वियद्गङ्गापूतं परममधुमाध्वीकमधुरम् ।
निधानं सौख्यानां प्रविततयशो भावभरितं
सुधातुल्यं कर्णेष्वहह कविवाणीविलसितम् ॥११॥

तपस्तप्त्वा मोक्षं कलयतुतमां तापसजनः
समीहन्तामन्ये धनबलयशोज्ञानविभवम् ।
कवीनां सर्वस्वं सलिलमिव मीनस्य च परं
रसव्यक्तेर्मूलं सहृदयसुवाणीविलसितम् ॥१२॥

अन्योक्तयः

प्रदर्शयध्वं बलवीर्यकौशलं
यथेच्छमुद्दाममदैर्मतङ्गजाः ।
विहाय कान्तारवनान्तरं यतो
मृगाधिपोऽयं विवशोऽस्ति पञ्जरे ॥१३॥

पिकेदानीं कर्णेष्वमृतमधुनिष्यन्दिमधुरं
वमस्यानन्दं त्वं विगलितविरामं कलकलम् ।
परं मौनं शीघ्रं भज कटुनिनादैरुपगतै-
स्तपन् श्रोत्रं ध्वांक्षध्वनिमदमुपेतोऽस्ति समयः ॥१४॥

गोविन्द पाण्डेयः

स्थित्वा तुङ्गपदे सगर्वमनसां निर्घोषमातन्वतां
घातं तीक्ष्णतडिद्घनेन करकापातेन वा कुर्वताम् ।
भीष्मप्लावनतोऽपराधरहितान् हा प्राणिनो विघ्नता-
मस्त्येतद् भवतां कुलीनसदृशं किं कर्म भो वारिदाः ॥१५॥

ऋतुवर्णनम्

वसन्तः

वनावलिं पुष्पमयीं वितन्वन्
चराचरेष्वाहितमुग्धभावः ।
मनोभुवाऽनन्यसुहृद्वरेण
सहागतोऽयं सरसो वसन्तः ॥१६॥

द्रुमप्रवालैरभिवीज्यमानो
द्विजालिभिः सन्ततगीतकीर्तिः ।
चाम्पेयसिंहासनराजमानः
सर्वर्तुराजः प्रसृतो वसन्तः ॥१७॥

पिकस्वरैरुन्मदयन् समस्तान्
वियोगिनो वासगृहोन्मुखांश्च ।
उत्कायमानाश्च वियुक्तरामा
व्यधादयं चित्तहरो वसन्तः ॥१८॥

पञ्चेषुपञ्चेषुविमथ्यमानं
निजप्रियाप्रीतिपरं मृगेन्द्रम् ।
मुखागतप्राणिहतेर्विरक्तं
करोत्यहो एष कृती वसन्तः ॥१९॥

प्रफुल्लपद्मैर्मकरन्दनिर्झरै
रक्तोत्पलस्थैः सुपरागपुञ्जैः ।
गुञ्जद्द्विरेफैरभिनन्द्यतेऽसौ
पद्माकरेणातितरां वसन्तः ॥२०॥

शरद्

नव्याम्बुवैभवभरोन्मदतां गतेन
गर्जापरेण मलिनेन वियोगभाजाम् ।
कष्टं त्वयार्पितमतो घन ! तस्य पाकः
श्वेतं गतो भ्रमसि शून्य इवाद्य खिन्नः ॥२१॥

रे जिह्मगप्रिय तवाद्य न नर्तनस्य
नो वा ध्वनेः कलकलस्य विभाति कालः ।
आस्तेऽधुना धवलपक्षसमाश्रितानां
रम्यस्वनो विततहंसकदम्बकानाम् ॥२२॥

शुभ्राम्बरा घनकचानवलम्बमानान्
संहृत्य दर्शितसुधांशुशुभाननश्रीः ।
आदाय पद्मपरिपूर्णसरःसुपात्रं
भक्त्यार्चितुं शरदुमां समुपागताद्य ॥२३॥

सिताम्बरा चन्द्रविभासितानना
प्ररूढसस्यालिदुकूलमण्डिता ।
सरोम्बुलावण्यमयी मनोहरा
विभात्यपूर्वा सुषमाद्य शारदी ॥२४॥

मरन्दलुब्धभ्रमराभिगुञ्जनै—
र्वियोगभाजां कलहंसनिःस्वनैः ।
प्रियाप्रियालापतदीयनूपुर—
स्मृतिप्रदाऽऽगात् सुपमाढ्य शारदी ॥२५॥

हेमन्तः

पद्मान्याशु तुषारपुञ्जपविना सञ्चूर्य पद्माकरं
कुर्वन् श्रीरहितं, गृहाद्विरहितं भृङ्गं रुदन्तं दिशन् ।
शैत्येनातिदलञ्जनान् विरहितान् प्रौढैः पटैरुन्मदै—
र्हेमन्तोऽन्तकसन्निभो जडमतिः क्रूरः समुज्जृम्भते ॥२६॥

मनोरमापीनकुचाचलाञ्चले
तिरोहितं ग्रीष्मसरातिपुङ्गवम् ।
गवेषितुं नैजमनन्यमायुधं
तुषारमादाय हिमर्तुरागतः ॥२७॥

स्मृतप्रियालिङ्गनपानचेष्टितान्
प्रवासिनः संव्यथयन्ननुक्षणम् ।
क्षिपंस्तुषारोग्रशरानुपागतो
मनोभुवा मित्रवरेण सोऽधुना ॥२८॥

रुषा ज्वलन्तीं प्रणयापराधत—
श्चिराय मानं दधतीं च मानिनीम् ।
स्ववैभवेनैव करोति तत्क्षणं
विधूतमानामरुषं मृगेक्षणाम् ॥२९॥

चन्द्रभानु त्रिपाठी



जन्मतिथि: १९८१ वि०सं० फाल्गुन-शुक्लदशम्यां गुरुवासरे। जन्मस्थानम्-ग्राम:— एकडला, पत्रालय:—सरौली, फतेहपुर (उ० प्र०)।

श्रीत्रिपाठिन: सम्प्रति 'इलाहाबाद स्नातक महाविद्यालये' संस्कृतविभागाध्यक्षा: सन्ति। एभि: क्रमेण स्वपितामहेभ्य: प० राजीवलोचनत्रिपाठिभ्य: सर्वत: पूर्वमध्ययनमारब्धम्। तत: क्रमेण हाथरसे प० गयाप्रसादमिश्राणां, फतेहपुरमण्डलान्तर्गते शिवपुरे प० रामचन्द्रत्रिपाठिनां, प्रयागे प० रमाशंकरद्विवेदिनां च सन्निधौ शास्त्राण्याकलितानि।

एतेषां रचनासु सर्वत: स्वाभाविकत्वं किंचिद् विलक्षणमिव च माधुर्यं परिस्फुरति। एतेषां गीतेषु प्रत्यक्षरं हृदयनिहिता भावा: समग्रतया स्फुटतामुपलभमाना इव शक्यन्त आकलयितुम्। व्याकरणशास्त्रे सम्यगभिनिवेशवन्तोऽपि त्रिपाठिवर्या न सर्वथा 'टिड्ढाणञ्पण्डिता:', परं 'निरन्तरं काव्यानुशीलनाभ्यासविशदीभूतचेतसो'ऽपि सन्ति। एतेषां प्रकाशिता: काव्यग्रन्था:—'गीताली' (संस्कृतगीतानां संकलनम्, उत्तरप्रदेशशासनेन पुरस्कृतम्। 'कालिदासागमनम्' (एकाङ्किरूपकम्) 'सुजाता' (संस्कृत नाटकम्) च।

चन्द्रभानु त्रिपाठी

समस्यापूर्तयः

नास्ते स्वर्णमयं धनं न च कुलं रूपं न शास्तुः पदं
किञ्चिन्नैव यदर्थमस्ति विहितो लोकेऽभिमानो मया।
जीवानीति च जीविकाऽतिसरला वासस्त्रिवेण्यास्तटे
गाङ्गं वारि हरेः कृपास्पदमतो भूयोऽपि किं चिन्त्यते ॥१॥

सर्वः स्निग्धजनो विपन्न इति मां दूरे स्थितः पश्यति
क्रुद्धः शत्रुगणोऽपहासनिरतः प्राणेषु लुब्धोऽहितः।
मुग्धो बन्धुजनो न कोऽपि विपदस्त्रातुं क्षमो रे मनः!
ग्राहाद् येन गजो व्यमोचि स हरिर्नाथो न किं चिन्त्यते ॥२॥

येनाकारि पयोऽमृतं कुचयुगे मातुः शिशोर्जीवनं
यस्यान्नानि फलानि वारि भरणं कुर्वन्ति देहस्य मे।
यस्त्राता विदितो विपत्तिसमये गीतः पुराणेषु च
आस्ते यः शरदः शतं नु स न किं विश्वम्भरश्चिन्त्यते ॥३॥

प्रसन्ना गम्भीरा मधुरमधुरा रम्यरचना
विराजन्ते यस्मिन्निखिलकविताभूषणगुणाः।
विशिष्टं तत्काव्यं सुरसरसितं यद्यपि परं
हरेर्भक्त्या हीनं भवति नहि वाणीविलसितम् ॥४॥

प्रभो ! याचे बद्ध्वाऽञ्जलिपुटमहं मुक्तिविरतो
भवेद्भव्या भूतिर्मम तनुजुषो भारतभुवः ।
सदा स्यात्संसेव्या सुरसरिदियं शुभ्रसलिला
भवत्पूजापूतं भवतु मम वाणीविलसितम् ॥५॥

यदा श्रुत्वा गीतं स्फुरतु नवरक्तं युवजने
सुवीरो यच्छ्रुत्वा निजमरिषु शौर्यं प्रकटयतु ।
यदर्थं विज्ञाय प्रभवतु सुधीर्निर्भयमना—
स्तदा वक्तुं शक्यं सुकविजनवाणीविलसितम् ॥६॥

रात्रिर्नीता विरहमहती नैव सुप्तं क्षणार्धं
चित्तं दत्तं शिवपदयुगे स्वप्नलब्धे कथञ्चित् ।
ज्ञात्वा तुष्टो मदनमथनोऽप्याशुतोषो भवानीं
गत्वाऽपश्यन्मुकुलितदृशं न प्रबुद्धां न सुप्ताम् ॥७॥

मा भूदोजो बुधवरमतो विद्यतेऽत्र प्रसादो
माधुर्यं चेन्न पदरचना भाति शुद्धा समस्ता ।
हे श्रोतारः ! शृणुत कवितां नोत्तमां नापि हीनाम्,
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥८॥

आयातोऽयं विषमसमयो भाविनी श्वः परीक्षा
अध्येतव्यः क इह विषयः कस्तथोपेक्षणीयः ।
एवं ग्रन्थेऽविकलकलिते यत्र कुत्रेक्षमाणा-
श्छात्रा दृष्टिं ददति विरलां न प्रबुद्धां न सुप्ताम् ॥९॥

चन्द्रभानु त्रिपाठी

आषाढस्य प्रथमदिवसे

प्रथमं चित्रम्

काचित्कान्ता पतिविरहिता जीवनं यापयन्ती
श्रुत्वा दूरे दयितगमनं वर्षमेकं प्रवासम् ।
वामा चक्रे व्रतमनुदिनं तच्चिरायुष्यकामा
ग्रामे स्वस्मिन् बहुपरिजने जानकीजानिनिष्ठा ॥१०॥

तस्मिन् ग्रामे कतिचिदबलाविप्रयुक्ता वरेण्या
नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठा ।
आषाढस्य प्रथमदिवसे श्याममालोक्य मेघं
पातिव्रत्यं कथमपि न सा रक्षणीयं ददर्श ॥११॥

द्वितीयं चित्रम्

कश्चिद्दीनः कृपणकृपकः स्वाधिकारे नियुक्तः
कन्योद्वाहं विभवबहुलं स्थापयित्वा कथञ्चित् ।
अन्नं स्वर्णं तिलगुडघृतानीष्टमिष्टानि चैव
सर्वैः सार्धं दुहितुरकरोत् पीतपाणिं प्रसन्नः ॥१२॥

ज्ञात्वा तुष्टं न वरपितरं सोऽददाद् युग्यगावौ;
नीत्वा मासान् कतिचिदबलापुत्रयुक्तो वराकः ।
आषाढस्य प्रथमदिवसे श्याममालोक्य मेघं
कृष्टिर्वर्षे कथमिह भवेदित्यनाथो रुरोद ॥१३॥

गीतिः

ऋतुराजविलासं पश्य सखे !

सुखदो दिवसो रम्या रजनी वाति च सुरभिर्वातः
मृदुकिसलयलसिता तरुराजिः पीतपत्रविनिपातः

समशीतोष्णः समयः सुभगच्छाया भाति वनाली
पल्लवपतिते हिमहासे रविकिरणविभासं पश्य सखे !

सरसरसालं मधुरमधूकं कोकिलमनुकूजन्तम्
कलितकुसुममकरन्दममन्दं मधुपं मुदा पिबन्तम्

ललितलवङ्गलतापरिचुम्बितमञ्जुमाधवीकुञ्जे
चपलखगानामतिमुदितानां मधुरं रासं पश्य सखे !

क्रमाः कुरवककलिकाः कोमलकोरकितं माकन्दम्
मुकुलिततिलकं कुसुमविभूषितसिन्धुवारवरवृन्दम्

सुमनोरञ्जितरक्ताशोकं मृदुलपलाशपलाशम्
सरसि कमलिनीनाले सुभगं कमलविकासं पश्य सखे !

गीतिका

रजनि ! भवतु ते शनैरतीतम् ।
स्नेहसूत्रसम्बद्धं नवयुवयुगलमस्ति सुप्रीतम् ।
सुखदमलयनिःश्वासौ मधुरावधरतरलतमहासौ
परस्परेणच्छुरितौ शशिनोरमरकिरणनवभासौ ।
तरुवरकरसम्पीडितलतिकाकरकिसलयानुभावौ,
द्वावात्मानौ द्वौ कामौ च द्वौ मार्गौ द्वौ भावौ ।
मिलतो वितते नीले तेऽङ्के परस्परं सुस्फीतम् ॥१॥

अद्य सुधासममधुराः स्वप्ना अद्य सुखं समुपेतम्
अद्य प्रेमपयोनिधिमग्नौ द्वौ त्यजतः स्वं द्वैतम् ।
कुञ्जे मधुपकलिकयोः सद्यो नवमिलनं सम्भूतम्;
प्राप्य रागिणीं मधुरां काञ्चित् स्वरः स्मरति न स्वत्वम् ।
तन्त्रीद्वयसंरचितमूर्च्छनाकृतं प्रणयसङ्गीतम् ॥२॥

क्षणमप्यसुकृतदुर्लभमधुनाऽऽभाति जगत्कमनीयम्;
द्वयोरेकयोः संयोगेऽस्मिन् गुणनं सदाऽद्वितीयम् ।
अत्र चित्रितेऽन्योन्यं मनसी मौनीभूते वदतः,
मनीषितं नवसर्जनपाठं मिलिते नेत्रे पठतः ।
तिक्तं विश्वं दूरे विलसति मधुरमत्र नवनीतम् ॥३॥

जगन्नाथ पाठकः



जन्मतिथिः (२-२-१९३४ ई०) वि० सं० १९९१, निवासः—कोठा-टोली, सहसराम, रोहतास (विहार)।

प्रसन्नगम्भीरपदायाः सुखश्रुतेः सरस्वतयाः साधकोऽयं नैसर्गिकः कविः पाठकवर्यः 'किमपि मधु नवमनास्वादितरसं' काव्यमनायासं विदधाति । अत एव हृदयस्पृक् ध्वनिरस्य काव्येषु सहृदयैरनुभूयते। अयं हि वाराणस्यां प्रातःस्मरणीयचरितानां कवितार्किक चक्रवर्तिविरुदविभूषितानां महादेवशास्त्रिवर्याणां श्रीचरणयोः परिशीलित-साहित्यशास्त्र इहैव विद्यापीठे गवेषणविधौ व्यापृतः व्याख्यातृपदमलङ्कुरुते । एतेन प्रणीतानि 'कापिशायिनी'प्रभृतीनि काव्यानि प्रकाशनाय सज्जान्यपि स्वभावसारल्यादप्रकाशितानि मित्रमण्डलीमात्रप्रसिद्धानि राजन्ते ।

जगन्नाथ पाठकः

समस्यापूर्तयः

भवन्ति श्रीमन्ति क्वचिदथ कुरूपाण्यपि यतो
मृदुत्वं वस्तूनि क्षणमथ कठोराणि दधति ।
चमत्कारं कश्चित् कलयदतिमात्रं किमपि तत्
कवीनां सिद्धानामिह जयति वाणीविलसितम् ॥१॥

रसाले मञ्जर्यो मधुरमधुपारावकलिताः
समन्ताद् द्योतन्ते प्रमुदितमिदानीमुपवनम् ।
परं सामग्र्येण स्फुरति नहि तावन्मधुरहो
न यावत्प्रारब्धं भवति पिकवाणीविलसितम् ॥२॥

अलङ्काराः सम्यग् विदधतु समे झङ्कृतिभरं
रसानामुद्रेको विलसतु तथा वा प्रतिपदम् ।
असंसिद्धं मन्ये सकलमिदमप्येतं न हि चेत्
कृपासिन्धौ तस्मिन् सफलमपि वाणीविलसितम् ॥३॥

कियद्वारं क्रौञ्चा इह न निहता व्याधविशिखैः
परं काव्यं रामायणमिदमिहैकं विरचितम् ।
स कालः स द्रष्टा स च हृदयवान् सा च करुणा
समेत्य द्योतन्ते यदि वलति वाणीविलसितम् ॥४॥

असन्तृप्तस्तावद् विचरति जनो वन्यपशुवत्
परान् हिंसन् लोकान् निरतिशयदौर्बल्यलुलितान् ।
न यावत् कारुण्याञ्चितमुदयति स्नेहकलितं
हृदि क्षेत्रेऽक्षुण्णं ललितकविवाणीविलसितम् ॥५॥

देव्या वाचः क्षणपरिमिलद्दिव्यदृष्टिप्रसादा-
च्चित्ते ज्योतिः किमपि सुकवेरान्तरं प्रोज्जिहीते ।
तस्मिन् काले विरतनिखिलद्वैतमूलप्रपञ्चः
सोऽत्येति द्राक् स्थितिमतितरां न प्रबुद्धां न सुप्ताम् ॥६॥

स्नात्वाऽऽपूर्य सुमृष्टहेमकलशं स्वच्छेन गङ्गाम्भसा
तीरोपान्तविरूढपुष्पकलिका उच्चित्य मन्दस्मितः ।
कश्चित्त्वां सह नेतुमिच्छुरधुना सङ्केतयत्येष रे
प्रातर्द्वारमुपागतः, स्वशयनादुत्तिष्ठः किं चिन्त्यते ॥७॥

मध्येधारमुपागताऽस्ति तरणिर्झञ्झा च संवर्धते
व्याकीर्णः शिरसि स्थितोऽतिविरसं गर्जन् घनाडम्बरः ।
व्यालुप्ताश्च दिशो न हन्त तटभूः संदृश्यते दूरतः
कोऽयं वक्ति शनैर्मम श्रवणयोस्तिष्ठामि किं चिन्त्यते ॥८॥

[1]न येन पठितं मुदा सुकविवाङ्मयं शोभनं
न येन शिथिलीकृतः प्रियकलत्रमानग्रहः ।
न येन च निषेविताऽनवरतं सतां सङ्गति—
र्न तेन बत चेष्टितं करपुटेन पातुं सुधाम् ॥९॥

---

१. इतोऽष्टौ श्लोकाः गङ्गानाथ झा जन्मशताब्दीसमारोहावसरे समायोजिते कविसम्मेलने पठितास्तात्कालिकसमस्यापूर्तयः सन्ति ।

आघ्रातो न च केनचित् स्मितमधुद्राक्क्षीणरागद्युतिः
प्रोन्मादं जनयन् नवोद्यदतनुस्वाध्यायशिक्षोद्यतः ।
पातुं चेदुपलभ्यते तदधरो यत्नेन केनाप्यहो
उच्छिष्टाऽमथ कः सुरैः सहृदयश्चेष्टेत पातुं सुधाम् ॥१०॥

स्रग्दामाङ्कितमस्तकः पथि पदं धत्ते शनै रासभः
काकश्चाम्रफलं पचेलिममहो निःशङ्किकं खादति ।
दृप्तः श्वा करलालितश्च युवतेरङ्के निमीलत्यलं
द्रष्टुं ये क्षमतां भजन्ति ननु ते पश्यन्तु धाराः क्षणम् ॥११॥

सञ्जातो बत चन्दनेन कलहो यत् कर्दमस्याधुना
भेकः कश्चिदितो विवेकनिपुणो मध्यस्थतां प्राप्तवान् ।
ब्रूते पङ्कनिमग्न एष लभते साम्यं न तच्चन्दनं
साकं किञ्चन कर्दमेन तदिदं शृण्वन्तु धीराः क्षणम् ॥१२॥

अद्यत्वेऽपि दशाननोऽपहरति क्रूरोऽबलां जानकी-
मद्यत्वेऽपि मुनेर्वधूः पदरजःस्पर्शं तवाकाङ्क्षति ।
अद्यत्वेऽपि सभागता द्रुपदजा क्षीणास्वरा वेपते
कार्यं ते बहुलं तथापि नितरां शेषेऽद्य शेषे कथम् ॥१३॥

त्वय्यायत्तमिदं महत् कृषिफलं ग्रामाङ्गनानां तथा
प्रीतिस्निग्धविलोचनानि विफलान्युज्जाग्रति त्वां विना ।
भूवध्वा हरिताम्बरं रचयितुं हे मेघ कालो ह्ययं
शेतां श्यामवपुः सुखं जलनिधौ, त्वं नाम शेषे कथम् ॥१४॥

प्रच्छन्नं स्वकुलायनिर्मितिधिया श्येनः समागच्छति
क्षुद्रक्रोडविषाणभग्नगतयः शुष्यन्ति कुल्यास्तथा ।
काका दुःसहमारटन्ति परितः पक्वाम्रवद्धेक्षणा
उद्यानं वनपाल नश्यति, झटित्युत्तिष्ठ, शेषे कथम् ॥१५॥

सन्त्येके तृषिताः सुखोपरिसुखावाप्तेर्न तृप्यन्ति ये
तान् प्रत्येप जनो बिभर्ति नितरां कारुण्यपूर्णं मनः ।
सन्त्यन्ये तृषिताः स्पृहाविरहिता येषां तृषा जीवनं
तान् प्रत्यस्य जनस्य सन्तु विगलद्बाष्पाः प्रणामाः शतम् ॥१६॥

कालिदासप्रशस्तयः

साक्षात्पानं सुरपुरभुवो देवलभ्यं सुधायाः
सद्यः स्नानं किमपि यमुनागङ्गयोः सङ्गमस्य ।
प्रेमालापश्रवणमथवा हारि वध्वा नवायाः
स्निग्धच्छायातरुतलशयः कालिदासप्रसङ्गः ॥१७॥

कुत एष इहागतः सुगन्धिः
पवनः कश्चन शीतलश्च मन्दः ।
किमितो मधुशालिकाऽस्ति काचित्
किमितो वा कविकालिदासगोष्ठी ॥१८॥

वागर्थमृण्मयलसत्सुभगैकपात्रा
दूरे तमो विदधती भुवनप्रकीर्णम् ।
स्नेहैकजीवनमुदारसुवर्णहृद्या
श्रीकालिदासकविदीपशिखा विभाति ॥१९॥

माघो देव्याः कुटिलकुटिलभ्रूचितः सत्कटाक्षो
वाणो वीणाक्वणनमुखरः सालसो वाग्विलासः ।
प्रीतिस्निग्धं सरसमृदुलं लक्षितं पुण्यभाग्भि-
स्ताम्बूलश्रीविरलखचितं सुस्मितं कालिदासः ॥२०॥

लोके सम्यक् तृषिततृषिते ग्रीष्मतापाभिभूते
कारुण्याख्ये सुखदसलिले शोषमाप्ते समन्तात् ।
आषाढस्य प्रथमदिवसो मेघदूतैकसृष्टिः
सन्तप्तानां शरणमधुना केवलं कालिदासः ॥२१॥

न्यासे न्यासे किमपि सरसं नूपुरक्वाणरम्यं
लज्जास्निग्धं ललितललितं चित्तसम्मोहकारि ।
मन्दं मन्दं सहजमृदुलं यौवनस्पर्शभाज-
स्तत् कस्याश्चिद् गतिविलसितं लक्ष्यते कालिदासः ॥२२॥

वाल्मीकेर्मुखमण्डलादभिनवा सद्यः प्रसूताऽभवद्
या संवर्धनमाप दर्भकवलैर्व्यासाश्रमे वाङ्मृगी ।
तामागत्य च कालिदासहरिणः संस्पर्शसम्मीलिता-
मेकान्तेषु यदा कदाचन मुहुः शृङ्गैरकण्डूयत ॥२३॥

× × × ×

आधाय स्वहृदि प्रियाधरमधुस्वादाय दिव्यां तृषं
शास्त्राभ्यासमदं विधाय नितरां दूरे भवद्भिर्बुधैः ।
सन्धाय श्रवणाख्यसौम्यपुटकं स्वस्थेन सच्चेतसा
गोष्ठ्यां सम्प्रति कापिशायनमिदं निक्षिप्तमेकं सेव्यताम् ॥२४॥

कापिशायनी

कुसुमेन शिरो ह्यलङ्कृतं
तदिदं नाम महन्महत्सुखम् ।
निरलङ्करणां परं लता-
मवलोक्यापि मनोऽवसीदति ॥

नव वा मम वाऽस्ति जीवने
नहि काचित् परमार्थतो भिदा ।
अयि रूपिणि ! रूपमेव ते
कुरुते दर्शकदृश्यभावनाम् ॥

जलमध्यगता महोर्मयो
मम नावं तटभूमिमानयन् ।
तटभूमिगता लघूर्मयो
मम नावं शनकैर्न्यमज्जयन् ॥

गगनं मधुवेश्म किं शशी
मधुकुम्भः किमयं समुद्गलः ।
उडवः किमिमे च पायिनो
निपतन्तः क्वचिदुत्थिताः क्वचित् ॥

परिशीलनयापि यत्नतो
न जनः कोऽप्यमिलन्मधुव्रतः ।
यदि सन्त्यपरे पिपासवो
न विदन्त्येव नु तेऽक्षिभाषितम् ॥

अमृताय कियन्नु कांक्षितं
यदि पूर्णं मधु काचिदर्पयेत् ।
अमृतं मधुरं हि केवलं
मधुरोन्मादकलक्षणं मधु ॥

शिथिलेषु मधुप्रदानतो
मधुयोषिज्जनपाणिषु क्षणम् ।
चषकः स्थिरभावमागतो
मम रिक्तोऽपि बभूव पूरितः ॥

चषका इह जीवने मया
परिपीता अपि चूर्णिता अपि ।
मदमेष बिभर्मि केवलं
क्षणपीतस्य मधुस्मितस्य ते ॥

विषमासु कुतोऽपि लभ्यते
न शमः सम्प्रति भाग्यवृत्तिषु ।
तव धार्मिक मन्दिरेषु वा
मधुशालासु च वा तव प्रिये ॥

प्रभात शास्त्री

जन्मतिथिः ज्येष्ठकृष्णद्वितीया १९७५ वि० सं०, निवासः—दारागंज, प्रयागः। संस्कृतस्य प्रवर्तमानेषु गीतकारेषु लब्धयशसां श्रीप्रभातशास्त्रिणां व्यक्तित्वं जीवनस्य नैकविधेषु क्षेत्रेषु व्यापकतां गतम्। एभिः सम्पादिता: 'सङ्गमनी'नाम्नी संस्कृतपत्रिका सुतरां सुप्रख्यातिमुपगता विराजते। एभिः सम्पाद्य प्राकाश्यं नीताः कतिपये काव्यग्रन्थाः सन्ति—गीतगिरीशम्, गीतपीतवसनम्, चिमनीचरितञ्चेति। गीतकाव्यस्य यावन्ति वैशिष्ट्यानि विद्वद्भिरनुशीलितानि प्रायस्तानि सर्वाणि शास्त्रिणा गीतेषु परिलसन्ति। प्रयागवासिनां कवीनां मध्ये श्रीशास्त्रिण इदानीं समधिकख्यातिमन्तो गीतकाराः सन्ति।

द्विजातयः !

द्विजातय इदं वचः शृणुत मामकीनं क्षणं
निभालयत चेतसा निगमवादिनां पद्धतिम् ।
विचिन्तयत भारतं पतितमार्तिगर्ते चिरात्
परैरहह ! शासितं सततशासनं ! प्राक्तनम् ॥१॥

यदीयवचनावली कलियुगे शुभा वर्त्तनी
पराशर इति स्मृतः स गदति स्म विश्चिन्तयन् ।
"युगानुगतकर्मणा युगपदेव सम्मोहिता
युगेन समतां गताः क्वचन निन्दनीया न ते" ॥२॥

चिरं स्मरत शाङ्करं युगभरे धियः शत्रवो
विशोधयितुमुद्बभौ विमलकम्बुजन्मा रवः ।
यतो भुवनमण्डले श्रुतिरवोऽधुना श्रूयते
यतश्च भरतावनौ सशिखसोपवीताः स्थिताः ॥३॥

अपौरुषवचोऽधुना धुवति नाघजालं न वा
पवित्रयितुमूर्जितं भवति गाङ्गमम्भोऽप्यलम् ।
हरेरपि पदाम्बुजं हरति नेति वाग्वेदना
दधत्यतितरां मनो ग्लपयति स्थिरां चेतनाम् ॥४॥

स षोडशकलः पुमान् जगदधीश्वरो राघवो
निषादमपि वक्षसा त्रिपथगा तटेऽपीस्पृशत् ।
नरेष्वगणितान् कपीन् सहचरान् समापादयन्
विभीषणमतत्यजन्न रिपुवंशजं राक्षसम् ॥५॥

गृणन्ति सततं तु ये विमलरामनामावलीं
वचांसि मनुचिन्तितान्यथ च पालयन्त्यादरात् ।
श्रयन्ति बहुधा द्विजान् विनतभावनाभाविता
अमून् हरिजनानहो ! त्यजत निर्दयाः ! धीवराः ! ॥६॥

न धार्मिकविधिक्षतिः समवलोक्यते धार्मिकै-
र्महापतितशम्भलीजननिवासतो मन्दिरे ।
दिदृक्षुजनसङ्गमाद् भवति दूषितं तत्त्वतो
न शुद्धिकरणाद् विना भगवदर्चनं शोभनम् ॥७॥

स एव जगतां गतिः पतित-पावनो मन्दिरे
न येन गणिकासुता चरणसेवया हापिता ।
अघौघपरिभूषितो न समुपेक्षितोऽजामिलो
न मांसपरिशीलिताऽपि गमितः स्वयोग्यां गतिम् ॥८॥

"न सम्मुखमुपागतं शरणवाञ्छया दूरये
द्विजातिशतघातकं" स जगदे कदाचिद् विभुः ।
स्वयं तु समुपागतैर्हरिजनैरपूतोऽधुना
स्थितोऽपि निजमन्दिरे भवति हन्त ! किं ब्रूमहे ? ॥९॥

तुरुष्कसमितिः क्वचित् क्वचिदथाङ्ग्लसङ्घो नवो
विलोलयति मानसं बहुविधैरमीषां पणैः ।
निपात्य विततांक्षिभिः किमपि नोच्यते हिन्दुभिः
समापितमनीषितैः स्वजननाशसम्पादकैः ॥१०॥

समस्तजगदुद्भवस्थितिनिरोधसञ्चालकः
स एव जगदीश्वरश्चलति कोऽपि कालात्मना ।
तदीयमिव भाषणं शृणुत मौनमेनं न चेन्
न जातिरवनींतले स्मरत हैन्दवी स्थास्यति ॥११॥

प्रियव्रत शर्मा



जन्मतिथिः—१-११-१९२० ई० (वि० सं० १९७७) जन्मस्थानम्—मुस्तफापुर, पत्रालय:–खगौल, मण्डलम्-पटना (विहार)।

स्वाध्यायदृष्ट्या निरन्तरं भारतीयायुर्वेदशास्त्रानुसन्धानपरायणाः साम्प्रतं काशीहिन्दूविश्वविद्यालयीयस्नातकोत्तरायुर्वेदीयसंस्थाने द्रव्यगुणविभागाध्यक्षाः श्रीप्रियव्रतशर्माणः न केवलं सरसकाव्यरसिकाः परं संस्कृतस्य सुकृतिनो रससिद्धाः कवयोऽपि सन्ति। एभिर्यथा शरीरस्य स्वास्थ्यलाभार्थं विविधानि रसायनानि विधीयन्ते तथैव सहृदयानां परितोषलाभार्थमपि यथावसरं द्राक्षापरिपाकप्रचुराणि काव्यरसायनानि प्रस्तूयन्ते। सर्वतः पूर्वमेभिः श्रीमदयोध्याप्रसादचरितमिति ततः स्वकीयपितृचरणानां चरितमवलम्ब्य श्रीरामावतारचरितमिति निरमायि काव्यम्। काश्यां निवसद्भिरेभिस्तु वसन्तशतकं नाम काव्यं समुच्छलद्रसभावभरितं व्यरचि। यथा च व्यवहारे श्रीशर्माणः "मितं च सारं च वचो हि वाग्मिते"ति श्रीहर्षोक्तेरुदाहरणं तथैव काव्यनिर्माणेऽपि॥

प्रियव्रत शर्मा

सरस्वतीस्तुतिः

अखण्डविश्वाण्डविलोकनक्षमं
रसाञ्जनं सिद्धमनागसोऽर्द् शोः ।
ददाति वात्सल्यसुधासरस्वती
सरस्वतीं तां प्रणमामि मातरम् ॥१॥

भ्रुवोर्विभङ्गेन करोति हेलया
समस्तविश्वोद्भवभङ्गभावनम् ।
स्मितेन साहित्यकलासुगीतिका
नमामि तां वागमृतां सरस्वतीम् ॥२॥

दृगश्रुभारैर्भवभूतिभूति-
र्मनोविलासात् कविकालिदासः ।
स्वरेण बाणो हसितेन भासो
यया वृतस्तां प्रणमामि वाणीम् ॥३॥

प्रयागवर्णनम्

माघे वर्षति वारिवाहनिवहैर्मन्द्रं समुद्घोष्यते
निस्तन्द्रे नगरे प्रयागनगरे माऽघः समागच्छतु ।
माघ्यः कुन्द इवास्त्यसौ सुधवलः सत्त्वस्फुरन्मङ्गलो
मङ्गल्या नवसर्गवच्च सुकवेर्माघस्य नूत्ना कृतिः ॥४॥

संविद्धो वचसा खलस्य, मनसा सन्तापसंपीडितः
काये जर्जरितो रुजापरिकरैः दन्दह्यमानः क्षुधा।
लोकः शोकहरां सुपुण्यसलिलां भागीरथीसंगतां
कालिन्दीं कलुषप्रणाशकुशलां शीघ्रां समागाहते ॥५॥

तीक्ष्णो वाति समीरणश्च परितः शीतः समुज्जृम्भते
शष्पाच्छन्नतटास्तडागसरितो बाष्पावृता भूमयः।
प्रस्थाने शिशिरस्य शीर्णवपुषो जीर्णो रथः सज्जते
धीरोऽसौ मधुनायकः सुललितः सिंहासनं रोहति ॥६॥

शेते स्म प्रचुरप्रतूलनिचये यः शीतभीतो जनो
जानुन्याचिवुकं च नक्तमितरस्तद्वक्षसालिङ्गिते।
सम्प्राप्ते मधुमाधवे मधुकरव्रातान्विते प्रोन्मना
अन्विष्यन् कमपि प्रगाढरसवद् धारं तु धावत्यसौ ॥७॥

समस्यापूर्तयः

प्राची दिक् याति शोभामरुणिततिलका भास्करस्वर्णरश्मि-
भ्राजं भावं सपत्न्या भजति तनुतरा म्लानवीचिः प्रतीची।
तन्द्रां चापि प्रकामं त्यजति खगकुलः स्वं कुलायं विमुञ्चन्
मुग्धाश्चुम्बन्ति भृङ्गा मुकुलितकलिकां न प्रबुद्धां न सुप्ताम् ॥८॥

मुनेः शोकोद्रेकः प्रथमकवितायां परिणतः
पुना रामाख्यानं कविकुलगुरुव्यासवचनम्।
सुनृत्तं साहित्यं ललितकविकर्माभिकरणं
वचो वा वीणा वा सकलमिह वाणीविलसितम् ॥९॥

गावस्ते मुषितास्तु वत्ससहिताः कांग्रेसरेड्डीजनैः
गान्धीपक्षधरैरमौ तव वलीवर्दौ च संयाचितौ ।
सीरस्ते जनतादलेन सुचिरं स्कन्धेन धुर्यो धृतः
गार्हस्थ्यं कृषिमन्त्रिणाभ्युपगतं हे गोप किं चिन्त्यते ॥१०॥

वसन्तवर्णनम्

हिमं दूरीकुर्वन् द्रुमदलमथासौ किसलयन्
परं कुञ्जे गुञ्जन् मधुकरकदम्बं विकसयन् ।
विधुन्वन् वै धूमं सपदि बहुशत्रून् विदलयन्
वसन्तः संप्राप्तो हृदि सुहृदि हर्षं च जनयन् ॥११॥

अहो धन्यो न्यायो जगति मधुमासस्य विदितो
वराकं यः काकं विगलितविपाकं कलयति ।
विभर्त्ति स्वं भावं धृतरसविभावः परभृतो
मृतप्रायः प्राप्य त्वदनुशयमुज्जीवति भृशम् ॥१२॥

अपूर्वो गन्धोऽयं प्रसरति मदान्धत्वजननो
मधोर्मन्ये मत्तद्विपवदनजातं मदजलम् ।
विना माध्वीकेनानुभवति मदं मद्यपजनो
यदीत्थं स्याद् गच्छेत् क इह तु मुधा पानसदनम् ॥१३॥

अयं दग्धोऽनङ्गः सपदि सकलाङ्गं समभव-
त्तव स्पर्शोद्रेकादिति मधुपते ते हि महिमा ।
त्रिनेत्रोद्भूतार्चिर्दहनविकलांस्ताञ्छमयितुं
समर्थः कः सार्थो विलसति विना त्वामृतुपते ॥१४॥

हरक्रोधाद् दग्धं मनसिजमथो वीक्ष्य विकलं
रतिं चापि व्यग्रां विरहकलुषाम्लानवदनाम् ।
सह प्रह्लादेन प्रथितपुरुषेणापि स हरिः
समुज्जीव्यानङ्गं महितमहिमानं गमयति ॥१५॥

एते ते सौभाग्यं प्रकटयति नित्यं मनसिजः
स्वयं भस्मीभूतोऽप्यनिशमिह भस्मासुर इव ।
मुनीनां देवानामपि सपदि चित्तं चपलयन्
प्रकर्षं सामर्षं कलयति निजं क्रान्तवपुषा ॥१६॥

परं चैतत् शौर्यं कथमिव लभेस्त्वं मनसिज
न चेत् सत्यं मित्रं प्रभवतु वसन्तोऽतिशयितुम् ।
वसन्तश्चेद् दद्यान्नहि तव कृते पुष्पनिकरान्
कथंकारं मार प्रहरसि शरांस्त्वं परिसरे ॥१७॥

तवैवेदं श्रेयस्त्रिभुवनपतिर्यत्त्रिनयनो
यशो लेभेऽनर्घं मनसिजविदाहादिजनितम् ।
महादेवस्यार्थं कथय कथमास्तां जनरवो
न चेदासीस्त्वं वै युधि मदनदासस्य शरणम् ॥१८॥

वसन्त त्वं शान्तः सुविदितदुरन्तः कथमसि
प्रवादो लोके यः श्रुतिपथमुपेतः सहचरैः ।
हिमस्तातो माता तव शिशिरशीर्णा सहचरी
तयोस्तत् काठिन्यं सहजमिव प्राप्तं त्वयि सुते ॥१९॥

मुधा पान्थान् कन्थाविधृतपरिपाथेयनिवहान्
मधौ मध्याह्ने त्वं कथमिव पिपासून् प्रकुरुषे ।
अहो दाहो देहे तव मनसि चात्यन्तगहनो
यथोद्दामोद्दीप्तप्रविततनिदाघं जनयसि ॥२०॥

रमन्ते योषित्सु प्रवणमदनाः कामुकजना
वसन्तेऽहोयात्रं भुवि किल वसन्तः स्वसदने ।
परं पाथा अन्ये विधुरहतका दैवदलिता
भजन्ते मूर्च्छां ते विरहकृतपीडापरिगताः ॥२१॥

रसालोऽसौ बालो नवनवप्रवालोपवलितो
विधत्ते ताम्राभो गहनदहनोत्तुङ्गतुलनाम् ।
विधातुर्वैचित्र्यं भवतु कथमित्थं भवति भो
गुणे स्निग्धः श्लक्ष्णो मृदुरथ परं कर्मणि कटुः ॥२२॥

जराजीर्णः शीर्णस्तरुरपि दधात्याशु नवतां
तव स्पर्शान्नूनं गलितवदनो याति युवताम् ।
सुकन्याभ्रूभङ्गैश्च्यवनमुनिनाप्तं नववयः
फलं दिव्यं भुङ्क्ते त्वदनुशयितो दुःखितजनः ॥२३॥

प्रभाते वीणासु प्रखरमुखरासु स्फुटगिरा
चिरं त्वं सन्देशं वहसि नवशक्त्याः सुमधुरम् ।
अशक्तोऽपि त्वत्तोऽधिगतवरतो धावति भृश-
मपङ्गुः पङ्गुः स्याद् गिरिवरपदाधानसफलः ॥२४॥

—३—

मधूकोऽसौ नम्रः परिपतति मातुश्चरणयोः
स्वपुष्पाणामर्ध्यैः सरसहृदि चोत्फुल्लवपुषा ।
यथा गाथा लोके प्रसरति तथैयं प्रमुदिता
सिता कीर्त्तिर्मन्दं पवनमधिगम्योपचरति ॥२३॥

रसाले नैवास्ते कुसुमनिकरो नापि वकुले
परं सर्वत्रापि प्रभवति विधातुं विकसनम् ।
न निर्बन्धः पक्षे भवतु खलु कस्मिन्नपि तव
समत्वेनैव त्वं समुचितदृशा पश्यसि जगत् ॥२४॥

त्रियामा क्षामाभूदिति मनसि खेदः परमथो
तवायाते सर्वं भवति सरसं चाथ मधुरम् ।
निशा चेद् दीर्घा स्याच्चयि सति समर्था च रमणे
तदा को हेमन्तं भजतु भुवि शाल्यर्थमभगः ॥२५॥

सरागे दिङ्नागे स्रवति मदकुम्भाद् द्रवरसे
द्रुतं दिक्कन्यायाः सकलवसनं रञ्जिततमम् ।
विचित्रैस्तैर्वर्णैः कुसुमितरजः शृङ्गिकभृतै-
श्चिरं होलीं खेलत्युपगतप्रतोलीं रतिपतिः ॥२६॥

अहो चित्रं मित्र त्वदमृतमयी शिल्परचना-
विधाने चातुर्यं विधिविहितकल्पे निपुणता ।
समग्रोऽयं सर्गो विलसतितरां सुन्दरतमो
न कश्चित् क्षुद्रोऽपि त्वयि सति कुरूपत्वमयते ॥२७॥

बटुकनाथ शास्त्री खिस्ते



जन्मतिथिः—३०-१०-१९१८ ई० (वि० सं० १९७४) निवासः—१६/४३ पत्रकार नगर, विनायका, वाराणसी।

वाराणसेयानां दिगन्तविख्यातयशसां गोस्वामिदामोदरलालजी— म० म० लक्ष्मणशास्त्रि तैलङ्ग—श्रीभालचन्द्रशास्त्रि-तैलङ्ग—म० म० नारायणशास्त्रिखिस्ते-प्रभृतीनां परमसौभाग्यलभ्यसान्निध्यानां श्रीचरणेषु कृतस्वाध्यायाः श्रीखिस्ते-महाशया न केवलं संस्कृतस्य 'शिखण्डिमद् गौरीशङ्करशिखरं' समारूढाः सुललितच्छन्दोभावपरिलसितकाव्यनिर्माणे मार्मिकाः कवयोऽपि तु साहित्यशास्त्राम्भोधावगाहननिपुणा विद्वांसोऽपि। एषां यथा प्रत्यभिज्ञादर्शने तथैव भारतीय-तन्त्रशास्त्रेऽप्यभिरुचिः। एते सम्प्रति वाराणसेये सम्पूर्णानन्दसंस्कृतविश्व-विद्यालये साहित्यविभागस्याचार्या अध्यक्षाश्च सन्ति।

समस्यापूर्तयः

जडीभूतप्राये रुचिरकविसम्मेलनविधौ
विधौतस्वान्तैर्यत्किमपि नवमाधायि कुतुकम् ।
प्रयागे तन्मन्ये त्रिदशतटिनीभानुतनया—
समाश्लेषस्वैरोल्लसितसुरवाणीविलसितम् ॥१॥

महर्षीणामन्तःकरणपरिणामात्मकतया
यदेतत्पञ्चाशत्परिगणितवर्णाकृति महः ।
यदन्तर्माणिक्यं प्रगुणतरविज्ञानवपुषा
ऽप्यगण्यं तत्पुण्यं जयति सुरवाणीविलसितम् ॥२॥

दृशा दीनो हीनोऽप्यभिनववयोवृद्धिविभवै-
र्विरिञ्चिर्जीर्णोऽपि प्रथयतु कथं सृष्टिरचनाम् ।
दरस्मेरापाङ्गं क्वणितमणिवीणासहचरं
न सान्निध्यं विन्देद्यदि सपदि वाणीविलसितम् ॥३॥

जगज्जालज्वालावलयमयहालाहलमिल-
त्तमिस्रप्राग्भारप्रशमनभिषज्यं विजयते ।
सुधासारं सारस्वतनवनवोन्मेषकलना-
समुद्यत्सौन्दर्यं किमपि कविवाणीविलसितम् ॥४॥

विद्याभ्यासे नियमितमनाश्छात्रवर्गोऽयमास्तां
कान्तिः काचिद् भुवनदमनी तैरथोद्भावनीया ।
पौर्वापर्यव्यपगतमिदं जल्पतां नायकानां
प्रज्ञां मन्ये नयविगलितां न प्रबुद्धां न सुप्ताम् ॥५॥

तारापुष्पप्रकरविपिने काऽपि वापी सुधाढ्या
यस्यां केलिं निशि कलयते दिग्वधूनां कदम्बम् ।
दूरीभूते प्रणयिनि तदा सन्निषण्णां विषण्णां
कोकीमेकामहह कलये न प्रबुद्धां न सुप्ताम् ॥६॥

जातः पातः प्रमुखपदतः स प्रतापोऽपि यातः
काऽतः श्लाघा स्वयमनुचरैर्दूरमुत्सारिताऽसि ।
स्वप्नालोके सृजति बहुधा प्राज्यसाम्राज्यलेखां
तत्त्वां मन्ये विधुरविजये ! न प्रबुद्धां न सुप्ताम् ॥७॥

अद्य श्वो वा प्रणयलतिका जीविताालम्बनो मे
प्रेयानायास्यति नयनयोः पारणां दातुकामः ।
चिन्तामित्थं निशि निशि भृशं धारयन्ती कृशाङ्गी
दृष्टिं धत्ते विरहविकलां न प्रबुद्धां न सुप्ताम् ॥८॥

विद्यां हृद्यतमामवाप्य महति स्थानेऽपि माने स्थितिं
नानावैभवसाधनानि च धनान्याहृत्य नित्योद्यमैः ।
सम्प्राप्ते चरमे वयस्युपरमे मैत्रीं तिरस्कुर्वता
विज्ञेनाऽपि धनानुधावनधिया जाने न किं चिन्त्यते ॥९॥

हिंसां ध्वंसयता मदीयवचसाऽशोकेन लोके पुरा
सम्राजा करुणाकरम्बितधिया रुद्धः स युद्धक्रमः ।
संग्रामैकरसास्तु सम्प्रति समे शिष्या इतीवाऽऽन्तर-
ध्यानावस्थितमूर्तिना भगवता बुद्धेन किं चिन्त्यते ॥१०॥

मन्दस्पन्दिमरुत्तरङ्गितलतावृन्दे मिलिन्दोऽधुना
निर्यन्मञ्जुलपुष्पसम्भवमधुस्यन्दं सुखं विन्दति ।
नान्दीं कन्दलयत्यनङ्गनृपते रङ्गाग्रदूतः पिक-
स्तत्त्वं ब्रूहि मनोरमे ! तव मनोमानेन किं चिन्त्यते ॥११॥

शरदिन्दुमुखी

अमला कमलासनसन्निहिता
विहिताऽखिलभक्तकदम्बहिता
महिता विधिशौरिहरैर्जयतात्
कृपया सहिता शरदिन्दुमुखी ॥१२॥


विधृतोज्ज्वलचन्दनमाल्यगणा
धवलाम्बरतारकहारवती
त्रिदशीव धरावलये दयितं
विचिनोति नु किं शरदिन्दुमुखी ॥१३॥

घनसन्तमसच्छिदुरैः किरणैः
कविकैरवजागरणप्रसिता
भ्रमरक्वणितैर्मुरलीरणितै-
रियमेति सखे ! शरदिन्दुमुखी ॥१४॥

कलिकारदना विलसन्मदना
सुरभिश्वसना जलमुग्वसना ।
कलहंसकशिञ्जितमञ्जुपदा
समुदेति मुदे शरदिन्दुमुखी ॥१५॥

परितो हरितो हरितो दधती
कुसुमस्तबकाम्बरसंवलिताः
ललनाः कलनादपरास्तनुते
ललितेव सखी शरदिन्दुमुखी ॥१६॥

ब्रह्ममित्र अवस्थी



जन्मतिथिः—१६-१०-१९२९ ई० (वि० सं० १९८६) निवासः—करोवन, उन्नाव (उत्तर प्रदेश)।

प्रसिद्धः काव्यशास्त्रप्रवीणः अवस्थिवर्यः विद्यापीठेऽस्मिन् प्रवाचकपदमलङ्कुरुते। अध्ययनाध्यापनयोर्यथाऽस्याभिरुचिस्तथैव लेखनप्रकाशनयोरुत्साहः। अतोऽनेन प्रणीताः बहवो ग्रन्थाः विदुषां समाजे लब्धादरा विराजन्ते। विविधशोधकार्येषु नैरन्तर्येण व्यापृतस्यास्य कविकर्मणि यद्यपि भूयिष्ठा प्रवृत्तिर्नाभिलक्ष्यते तथापि मित्राणामनुरोधेन मनोविनोदनार्थं यदा कदा कवितामपि करोति।

समस्यापूर्तयः

कश्चित् कान्ताविरहजनितेनानलेन प्रकामं
तप्तो मन्दं सरसमधुरं गीतमेकं निशम्य ।
दैवाल्लेभे चिरमभिमतां क्षीणनिद्रां तया च
बालां प्राप्नोत् कुसुमशयने न प्रबुद्धां न सुप्ताम् ॥१॥


तस्मिन् काले चिरविरहितः कान्तया स्वीययाऽसौ
द्वित्रान् शब्दानमृतभरितान् श्रोतुकामः स तस्याः ।
लक्ष्मि ! क्वासीत्यहह कथयन् वीतनिद्रो वराको
नैवापश्यत् क्वचिदपि प्रियां न प्रबुद्धां न सुप्ताम् ॥२॥

सुरम्ये देशेऽस्मिन् मधुरमधुरे सौरभभरे
वनान्ते गुञ्जद्भिः परमरमणीये मधुकरैः ।
कुहूरावैरुग्रैर्युवजनमनोज्ञैर्विलसिते
ध्रुवं रोचेतेदं युवतिजनवाणीविलसितम् ॥३॥

अस्योत्तरम्

असारः संसारः क्षणपरिचितः सौरभभरो
मुहूर्तं स्यात् माद्यन्मधुकररवो झंकृतिघनः ।
तडिज्ज्योतीरूपं विषयविषपूर्णं मधुमुखं
कथं रोचेतातो युवतिजनवाणीविलसितम् ॥४॥

यागेश्वर झा



जन्मतिथिः—१-४-१९१८ ई० (वि० सं० १९७५) जन्मस्थानम्—पँचगछिया, सहरसा विहार)।

साम्प्रतं प्रयागे त्रिवेणीतटव र्ति श्रीसच्चाऽध्यात्मसंस्कृतमहाविद्यालये व्याकरणादिशास्त्राध्यापनपरायणाः श्री झामहाशया धाराप्रवाहसंस्कृतकाव्य-निर्माणेन सहृदयानां चेतस्सु चमत्कार-माविर्भावयन्तो विराजन्ते। 'यत्काव्यं मधुवर्षि धर्षितपरास्तर्केषु यस्योक्तयः' इति श्रीहर्षोक्ति स्वस्मिन् गतार्थयन्तः इमे राष्ट्रभाषायां 'जनशक्तिमहाकाव्यम्' इति प्रकाशितया रचनया सुविदितचराः सन्ति। एतेषां हृदयं सर्वथा भारतीयसंस्कृतिधर्ममर्यादापरिकलितं विविधकाव्य-रसस्रोतोमूलभूतं विद्यते।

योगेश्वर झा

तीर्थराजस्तुतिः

नमस्तीर्थराजाय तुभ्यं नमो
यस्य सम्पर्कसौभाग्यलिप्साशया
रम्यवृन्दावनस्वैरसञ्चारमुल्लङ्घ्य
कृष्णा वितृष्णा परब्रह्मणि प्रायशः ।

जाह्नवी निम्नगाभूदपि प्राप्य विष्णोः पदं
शैवमुच्चैः पदं सर्वतोऽखर्वगर्वा
हरिद्वारतो धावतीवातुरा संगमायागता
या सिता चासिता चामरे द्वे विभातः सदा ।

सर्वशुभ्रा सरस्वत्यपि ब्रह्मलोकादिहैवागता
त्वां समाश्लिष्य याऽनन्यधन्याऽभवत्
स्यात् कदाचिन्न विश्लेष इत्याशया-
ऽलीयतान्तः प्रविश्य त्वयि प्रायशः ॥१॥

प्रत्यहं यत्र पुण्यार्थिनो भारतस्यायुता
दिग्विदिग्भ्यः समायान्ति दूरा-
दतीवादरादङ्गवङ्गाः कलिङ्गाश्च
धर्म्मध्वजा मैथिला अप्युदीच्याः

प्रतीच्याश्च नेपालपाञ्चालहैमाचलाः ।
माथुरा गुर्ज्जरा मालवा सिन्धवो
दक्षिणात्या महाराष्ट्रतः कामरूपादपि
श्रद्धया मज्जनस्नानदानादिना-

राजसूयाऽश्वमेधाधिकं
पुण्यमत्रालभन्तेतरां
तत्र वेदाः प्रमाणं पुराणेतिहासादयः ॥२॥

वापमत्रैव निर्वाप्य पिण्डान्
पितृभ्यः स्वधाकारतः,
सद्गतिं प्रापयन्ति स्वबन्धून्
परेतान् गुरून् पूर्वजान्—

मातृमातामहादीनतिश्रद्धया,
लुप्तपिण्डोदकानप्यपुत्रान्
स्वकीयान् कुलानेकविंशत्यपि
श्रूयते तारयन्त्यत्र मध्वाज्ययुक्तान्-

यवागूस्तिलान् शाकसक्तून्
प्रदायाऽपि माहात्म्यमत्यद्भुतं ते
पुनस्तीर्थराजाय तुभ्यं नमः ॥३॥

योगेश्वर झा

सङ्गमादेव ते संगमे जाह्नवीयामुने
मज्जनाज्जन्मजन्मान्तरादागतान्
ब्रह्महत्यासुरापानगुर्वङ्गना-
संगमद्यूतचौर्यानृताभाषण-

भ्रूणहत्यादिपापानपाकृत्य
संतापतो जन्ममृत्यूद्भवान्
निष्कृतिं प्राप्नुवन्तीति ते
डिण्डिमाडम्बरः श्रूयते ।

छत्रमस्त्यक्षयाख्यो वटस्ते
समृद्धिश्च धर्म्मो न कर्म्मान्तराल्लभ्य
इत्याकलय्याहमभ्यागतस्त्वां महाराज
धन्यस्त्वमेवासि नान्यो वदान्यो न मान्यः

सदृक् तीर्थराज त्वया पुष्करो
न प्रभासोऽधिकं भासते
तीर्थराजाय तस्मै प्रयागाय तुभ्यं नमः ॥४॥

समस्यापूर्तयः

येनैते पृथुवैन्यहैहयमुखा भूपा अपूपा इव
निक्षिप्ताः स्वमुखे च येन भगवान् रामोऽथ कृष्णोऽपि वा।
सोऽयं कालउपागतोऽन्तिकमिति ज्ञात्वाऽपि सम्यक् त्वया
रे मन्मानस मूढ मोघमधुना मां ब्रूहि किं चिन्त्यते ॥१॥

चरन्तः सन्त्येतेऽप्यनुचितसमारम्भरसिका
इहानेके व्याधा विषविषमवाणव्यसनिनः।
मयूरा नृत्यन्तः शुक इह हताः क्रौञ्चशिशवो
न युक्तं न श्रेयः परभृतक ! वाणीविलसितम् ॥२॥

रतिनाथ झा

येषां काव्यनिर्माणेऽणुरपि नायासः परिलक्ष्यते, येषां सुकोमलं चित्तं द्रवीभूतं सदिव सरसमधुरकाव्यरूपपरिणाममभ्युपैति त एव सन्ति श्रीरतिनाथझा-शर्माणः वाराणसेयेषु संस्कृतकविषु प्रथितकीर्तयः। काव्यरचनायां स्वाध्याय-कालादेव कवितार्किकचक्रवर्तिनां पण्डितमहादेवशास्त्रिणां श्रीचरणेषु प्रवृत्तैरेभि-रद्यावधि सुविरचितानि सहस्राधिकानि पद्यानि समुल्लसन्ति।परं स्वकीयरचनायाः प्रकाशने प्रख्यापने वा कमपि मोहं न बिभ्रति झावर्याः। अतएव कतिपयाः परिगणिता एव रचना यत्र कुत्रचित् प्राकाश्यमुपगताः सन्ति। एतेषां हृदयखने-रुद्भूताः सुवर्णाः सर्वथा श्यामिकया विरहिताः सदसद्व्यक्तिहेतूनां सतामाकलना-यालम्। साम्प्रतमिमे काशीहिन्दूविश्वविद्यालयीयसंस्कृतमहाविद्यालयेऽध्यापन-रताः सन्ति।

समस्यापूर्तयः

सर्गारम्भान्मनुजहृदयक्षेत्रमासिच्य भव्यान्
भावाङ्कूरानसृजदमृतस्यन्दिनी भारती या ।
मन्दावेगा विहतविभवेवाक्षमा भूरिभूत्यै
सैवाद्यत्वे भजति नियतिं न प्रबुद्धां न सुप्ताम् ॥१॥

येन प्राप्य प्रथिततपसा नित्यतत्त्वप्रकाशं
त्यक्तः सर्वो जगति विषयो मेदुरोऽपि प्रकामम् ।
बन्धान्नित्यं ललितललितादप्युदस्तः प्रियार्थाद्
रामां रक्तामपि स भजते न प्रबुद्धां न सुप्ताम् ॥२॥

मल्लीवल्लीं कुसुमलसितां भृङ्ग ! नाङ्गीकरोषि
प्रत्याख्याय भ्रमसि मधुभृन्माधवीमप्युदाराम् ।
किन्तु स्निग्धामभिनवसखीं पद्मिनीं मञ्जुकोषा-
मत्यासक्तस्त्यजसि मधुरां न प्रबुद्धां न सुप्ताम् ॥३॥

शास्त्राभ्यासश्चिरमनुसृतः, पूजितोऽपीष्टदेवो
धर्माचार्योऽसकृदवसरेऽभ्यर्चितः श्रद्धयैव ।
किन्त्वायाते जरसि वयसि क्षिप्तबुद्धेर्मनान्त-
र्वृत्तिं तृष्णोज्झति बलवती न प्रबुद्धां न सुप्ताम् ॥४॥

श्रेयःप्रेयोघटननिपुणामीश्वरस्यानुकम्पा-
मेवाकम्पां हृदि धृतपदां चित्त ! सञ्चिन्तयेस्त्वम् ।
कल्याणं ते कलयितुमलं सा चिराराधितापि
न स्याद् यां त्वं त्यजसि दयितां न प्रवुद्धां न सुप्ताम् ॥५॥

स्मितज्योत्स्नामास्ये तरलयति लास्ये पदयुगं
विलासं संलापे जनयति शुभारम्भमुरसि ।
भुजे शौर्यं धैर्यं मनसि विकले क्लेशबहुले
प्रसूते यत्तत्त्वं तदिह कविवाणीविलसितम् ॥६॥

श्रुतिद्वारेणान्तःकरणशरणं प्राप्य सहसा
द्रवीभावं तिग्मीकरणममलोच्छ्वासमसमम् ।
शिरःकम्पं शम्पास्फुरणमपि चित्ते सृजति यत्
तदेव प्राशस्त्यं श्रयति कविवाणीविलसितम् ॥७॥

महालोके लोके तपति तपने व्योमसदने
शरज्ज्योत्स्नाजालं किरति विपुलं शीतकिरणे ।
अखण्डे ब्रह्माण्डे ज्वलति मणिदीपेऽप्यगणिते
तमःस्तोमध्वंसं विरचयति वाणीविलसितम् ॥८॥

हरत्यन्तस्तापं पिवति विषमुद्वेगजनितं
परीरम्भारम्भे जनयति विजृम्भां प्रणयिषु ।
रुषोऽशेषारण्यं दहति विनियुङ्क्ते हृदि रसं
गुणान् स्वान्ते सूते विबुधजनवाणीविलसितम् ॥९॥

वाणीविलसितम्

रणे प्राणोत्सर्गैरपि विजयलाभाय रिपुषु
प्रवृत्तिं शूराणां मनसि निदधात्येव निभृतम् ।
अलभ्यं सौलभ्यात्प्रशममपि बध्नाति हृदये
विमुक्तिं भुक्तिं वा प्रवितरति वाणीविलसितम् ॥१०॥

तृणीकृत्य प्राणानपि विपुलकोशानधिकृतान्
प्रदातुं सोत्कण्ठो भवति पुरुषो मुक्तममतः ।
अपि क्लेशावेशं सुकृतभवितुं साधु वृणुते
निपीयाचार्याणाममृतमिव वाणीविलसितम् ॥११॥

कठोरशिशिरोद्गमे गलितवैभवं वारिजं
प्रसूनमितरैस्तथा न मधु सौरभैरर्च्यते ।
दुरन्तनियतिक्रमे स्फुरति संहृताशारसे
रसालनवमञ्जरी हृदि मिलिन्द ! किं चिन्त्यते ॥१२॥

महद्भिरपि शासकैर्मनसि चिन्तितं पूरितं
विशेषबलशालिभिः सततमीक्षितं यन्मुखम् ।
तथैव पुनरीदृशं जगति जीवितं गर्हितं
गृहीतमिति दुर्विधेः फलमिदं न किं चिन्त्यते ॥१३॥

प्रचण्डरिपुमण्डलं झटिति दण्डितं खण्डितं
विमण्डितमनारतं चरणचुम्बि मित्रं भृशम् ।
प्रशस्तमपि पौरुषं हुतमथ प्रतापानले
तदेव दिनमुन्नतं विजितया न किं चिन्त्यते ॥१४॥

जनुष्यसुलभं फलं पद्मनाभयं काम्यते
पुमर्थनिकरं करे यदि निधातुमस्ति स्पृहा ।
समस्तविषमस्थितिं यदि निहन्तुमेवेष्यते
तदाशु करुणार्णवो हरिरहो न किं चिन्त्यते ॥१५॥

अशेषजगतीतले जयति भूतिदा भौतिकी
तदुन्नतिरिहापि सा ध्रुवमुपासनीया बुधैः ।
परन्तु मनुजात्मनि स्थिरविकारजातक्षयं
विधातुमिह संस्कृतं शिवमयं न किं चिन्त्यन्ते ॥१६॥

चन्द्रः प्रवालप्रभः

मन्दारद्रुमम‌ञ्जरीविरचितस्रग्दामभिर्मण्डिते
सामोदे मणिदीपपीततिमिरे श्रीधाम्नि केलीगृहे ।
शम्भोर्मन्मथमेदुराध्वरसमारम्भेऽभवत् पार्वती-
पादालक्तकलिप्तगात्रविभवश्चन्द्रः प्रवालप्रभः ॥१७॥

सिन्दूरैरनुलेपिते तिलकिते काश्मीरजैः कुङ्कुमै-
र्माल्यैर्मञ्जुजपाप्रसूनरचितै रक्तोत्पलैरर्चिते ।
शोणक्षौमविनिर्मिताम्बरवृते भक्तानुरक्ते परे
देवे श्रीमति ऋद्धिसिद्धिरमणे चन्द्रः प्रवालप्रभः ॥१८॥


दग्ध्वा व्योमवसुन्धराङ्गसुषमां हृत्वेन्दुताराश्रियं
पीत्वा हन्त कुमुद्वतीप्रमुदितामस्तङ्गते भास्करे ।
नृत्यन्त्याः क्षितिजेऽथ गीतरसिकानालापयन्त्या द्विजान्
सन्ध्याया नवसङ्गमात् समुदितश्चन्द्रः प्रवालप्रभः ॥१९॥

अन्यालिङ्गनलक्ष्म वक्षसि किमप्यालक्ष्य दन्तच्छदे
लग्नं कज्जलमाकलय्य विरसं वीक्ष्य प्रियस्यान्तरम् ।
जातेऽलक्तकलोहिते सुनयने गण्डे च रक्तोत्पले
मानिन्याः समभून्मृणालधवलश्चन्द्रः प्रवालप्रभः ॥२०॥

स्निग्धं बन्धुजनं प्रसादमधुरः प्रह्लादनो मादनः
पूर्वं यः स्मितचन्द्रिकामृतभरैरानन्दयन् राजते ।
सोऽयं सागसि वल्लभे मृगदृशः शोणद्युतेरुद्गमात्
सञ्जातो नवनीतनिर्मलरुचिश्चन्द्रः प्रवालप्रभः ॥२१॥

शुक्ले शुक्लयशोऽवतंसितजगज्जाले प्रतापानलो-
द्भासा भास्वरकेसरद्युतिमयो जातः प्रपञ्चोऽधुना ।
सर्वेषामनुरञ्जितं सुमनसामन्तर्निसर्गोज्ज्वलं
शम्भोर्भालविभूषणं च समभूच्चन्द्रः प्रवालप्रभः ॥२२॥

राजेन्द्र मिश्रः



जन्मतिथिः—पौषशुक्लपंचमी वि० सं० २०००, जन्मस्थानम्—द्रोणीपुर, जौनपुर (उत्तरप्रदेशः)

प्रयागविश्वविद्यालयात् संस्कृत-विषयमवलम्ब्य डी० फिल० इत्यु-पाधिविभूषिताः श्रीमिश्रा इदानीं तत्रैवाध्यापनरतास्सन्ति । नवेन वयसा कान्तेन वपुषा च संवलिता इमे संस्कृतस्य सफला गीतकारा उदीयमानाः (वस्तुतः समुदिताः) कवयः सन्ति । एतेषां मधुरस्वर-मण्डितं कारुण्यकलितं गीतमाकर्ण्य को वा सचेताः, यस्य हृदयं द्रवीभूतं न सञ्जायते ? एतेषां प्रत्येकं पदादेव स्फुटीभवति कस्यचित् प्रियजनच्छलितस्य विरहविह्वलस्य वेदनासह-गतः स्वानुभवः । सहृदयान् समग्रतया वर्णनीयतन्मयीभवनतामवाप्नुवतः हृदय-संवादभाजः कुर्वाणा राजेन्द्रगीतलहरी निरन्तरं प्रवहति ।

श्रीमिश्राः काव्यजगति अभिराजराजेन्द्रा इत्युच्यन्ते । संस्कृते प्रकाशिताः सन्ति एतेषां रचनाः—(१) नाट्यपञ्चगव्यम् । (२) अकिञ्चनकाञ्चनम् (३) आर्यान्योक्तिशतकम् (५) नवाष्टकमालिका (६) वाग्वधूटी ।

गलज्जलिका[1]

कमलया न हसितं विमलया न हसितम्
अये भाग्यवाले ! त्वयैवोपहसितम् !!

स्फुरच्चन्द्रिका शर्वरीप्राणभूता
चकोराङ्गनाया हृदानन्दपूता

सुखं रे तथापि क्षणन्नैव मिलितम्
अये मेघमाले ! त्वया किन्न छलितम् !!

तपोभिर्निबद्धो विहायात्मवासं
स्वयं दृष्टिमेतो हरस्त्वत्सकाशम्

---

१. उर्दू भाषायां यदेव गीतं 'गजल' पदेन व्यवह्रियते तदेव मया संस्कृतभाषायां गलज्जलिकेति समुच्यते। अस्मिन् गीते प्रायेण मर्मस्पृशो भावा नवनवोत्प्रेक्षणार्थच्छलादिसंवलिताः मध्यस्थीक्रियन्ते । कापि प्रियजनप्रवञ्चनोत्था पीडा निसर्गजयोगक्षेमविनाशिनी नियतिनटीलीलेव वाऽस्मिन् गीते लक्ष्यं भवति यच्छ्रावं श्रावं पाठंपाठं साधारणीकरणबलेन सहृदयाः निरर्गलाश्रुपूरितनयनाः सन्दृश्यन्ते । अतएव गलन्ति जलनि नयनाश्रूणि यस्यां सा गलज्जलिकेति मयाऽभिनवं समुत्प्रेक्ष्यते । ज्ञात्वा विपश्चितः प्रमाणमिति दिक् ।

समालिङ्गनं नो तथापि प्रभावितम्
अये शैलबाले ! त्वया किं विफलितम् !!

पिपासाकुलीभूय हा चञ्चरीकः
विलीनस्त्वयि प्रोषितश्चाप्यभीकः

गते वासरे तत्सुखं क्वापि गलितम्
अये पुष्पहासे ! त्वया किन्तु कलितम् !!

सदा गोपितं यत् प्रयत्नैर्मदीयैः
समाराधितं मौनमन्त्रैस्त्वदीयैः

तदेवाद्य दुःखं कथञ्चित् प्रवलितम्
अयेऽपाङ्गशाले ! त्वया किं विलुलितम् !!

धनं नैव याचे जनं नैव याचे
शपामि प्रभो ! सम्पदं नैव याचे

समीहे, मनो मे भवेत्त्वच्छबलितम्
मुकुन्दोपललितं विकसितं तरलितम् !!

स्कन्धहारीयम्[1]

नभसि विभाति चमत्कृतचन्द्रो भाति चन्द्रमसि छाया
सरसि विभाति सरागकमलिनो कमलिन्यामलिजाया !!

भाति भवने वधूटी षोडशी सदङ्गना
भाति गगने मुदी सतारका निरञ्जना !!

क्षणे क्षणे यन्नवतोपेतं प्रभवति तदेव रूपम्
क्षणे क्षणे यज्जडतोपेतं भवति तदेव विरूपम्

भाति विजने वसन्तकलकण्ठीवन्दना !
भाति भवने वधूटी षोडशी सदङ्गना !!

प्रीतिस्सा बध्नाति नायकं हरिणं या वागुरया
भीतिस्सा या कृन्तति हृदयं बद्धा भिया विधुरया

भाति कवने विचक्षणा विरूढा व्यञ्जना !
भाति भवने वधूटी षोडशी सदङ्गना !!

---

१. वरयात्रादिप्रसङ्गे शिबिकां वहद्भिस्सेवकैः स्वश्रमापनोदनार्थं यद्गीतं समवेतस्वरैः मध्येपथं गीयतेऽध्युत्तरप्रदेशं तदेव भवति स्कन्धहारीयं गीतमिति मदुत्प्रेक्षणम् ।

लोकभाषायामेतदेव कँहरवा इत्युच्यते। गीतमिदं स्कन्धहारैरेव केवलं गीयते स्म प्राक्तनयुगे तस्मादेव स्कन्धहारीयमित्याख्या। कुम्भकार > कुम्हार/कोंहार, स्वर्णकारः > सुनार, चर्मकारः > चमारवदेव स्कन्धहारः > कन्धहार > कँहार इत्यपि निष्पन्नो भवति । वाचोयुक्तिमनुभूय विद्वांसः प्रमाणम्

देहे भाति मनो दुर्ललितं प्रीतिर्मनसि विभाता
प्रीतौ निष्ठा भाति पुराणी सैव पिता सा माता

भाति नयने दिशा प्रतीची मञ्जुदर्शना !
भाति भवने वधूटी षोडसी सदङ्गना !!

चैत्रकम्[1]

मातः किमु करवाणि !!
विधुमभिसरति कुमुदिनी रे मातः किमु करवाणि
प्रोषितपतिका विरहिणी रे मातः किमु करवाणि !!

पवनो वहति मलयगिरिसूतः
रेवातटगतवञ्जुलपूतः
वितरति सुममधु नलिनी रे मातः किमु करवाणि !!

---

१. प्रोषितपतिकया विरहिण्या गीयमानं भर्तृविषयकचिन्तावितानचित्रणपरं गेयमुत्तरप्रदेशीयग्रामटिकासु 'चैता' नामधेयेन व्यवह्रियते। चैत्रकं चैत्रीयं वाऽस्य नाम भवितुमर्हति संस्कृतभाषायाम् । मल्लिखितस्यास्य गीतस्य इदं वैशिष्ट्यं यदत्र प्राक्तनवियोगचित्रणस्य साम्प्रतिकलोकमानस-चित्रणस्य च समन्वयः । एकतस्तावत् रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते इति साहित्यदर्पणादिशास्त्रग्रन्थेषु चित्रिता वियोगवर्णना निबद्धाऽस्मिन् गीते अपरतस्तावत् कलिकातानिवासादिवृत्तोपनिबन्धनेना-द्यतनमपि वियोगचित्रणं कल्पितम् । मन्ये गीतमिदं सहृदयहृदयाह्लादकरं भवतीति शम् ।

रौति रसालतरौ कलकण्ठी
श्रुतिकुहराय भवति ननु शुण्ठी
न खलु भवामि कुशलिनी रे मातः किमु करवाणि !

वर्षति दृगिह सततसलिलौघम्
तदपि न शमयति विलुलितशोकम्
भाति सपत्नीव रजनी रे मातः किमु करवाणि !!

निर्दय दयित ! वससि कलिकाताम्
प्रेषयसे न समागमवार्ताम्
हसति ननान्दा विभविनी रे मातः किमु करवाणि !!

व्यर्थमहो विहितौ व्रतनियमौ
द्वावपि विधुतपनौ हतकयमौ
प्रभवति नियतिनियमनी रे मातः किमु करवाणि !!

रेवाप्रसाद द्विवेदी

जन्मतिथिः—२२-८-१९३५ (वि० सं० १९९२)

जन्मस्थानम्—नादनेर, भोपाल (मध्यप्रदेशः)

काशीहिन्दूविश्वविद्यालयीयसंस्कृतमहाविद्यालये साहित्यविभागस्याध्यक्षत्वं संविभ्राणाः श्रीद्विवेदिनो न केवलं साहित्यशास्त्रस्य परिनिष्ठितास्तलप्रवेशमवाप्ता विद्वांसः परं संस्कृतस्य सुविदितचराः सुकवयोऽपि सन्ति। एतेषां कल्याणी मतिरुभयथा विदुषां सहृदयानां च विस्मयं तन्वाना जाजागरीति। हृदयान्तर्गूढभावानां समुद्बोधे समर्था द्विवेदिवर्याणां भणितयः कमपि विलक्षणमेव गाम्भीर्यमादधाना परिलक्ष्यन्ते।

"स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम्" इति भारव्युक्तिरक्षरशस्तदीयरचनासु गतार्थतां नीतेव प्रतिभाति। एतेषां "सीताचरितम्" नाम महाकाव्यमाधुनिकसंस्कृतसाहित्यजगतो महत्युपलब्धिरिति शक्यते वक्तुम्। यूथिकेति संस्कृतनाटिकाऽपि प्राकाश्यमवाप्ता।

समस्यापूर्तयः

दिल्लीपीठे निविडनिविडं पादमाश्राय सिद्धां
वीतध्वान्तां विदलितपरामिन्दिरां तीर्थराजे ।
न्यायाधीशादिह वत जगन्मोहनाद् ग्लानिमाप्तां
सम्प्रत्येतां कलयत दिशो न प्रबुद्धां न सुप्ताम् ॥१॥

आशावन्धाँल्ललितजनताचित्तलग्नाश्चिरत्नान्
नानाकारान् सरसि सुभगान् पद्मकोषान् यथैव ।
या वै व्याली विषमविषमैः पादचारैरचौत्सीत्
पश्यन्त्वेतामवटपतनान्न न प्रबुद्धां न सुप्ताम् ॥२॥

मार्चे सप्तत्रिगुणिततिथाविन्दिरासञ्ज्ञयाभ्यां
लब्धा का वा गतिरिति धिया न प्रबुद्धां न सुप्ताम् ।
जन्माष्टम्या इव सहचरीं मन्महे भारतस्य
त्रिंशद्वर्षोत्तरमुपगतां मुक्तिरात्रिं महिष्ठाम् ॥३॥

एका हिन्दी तदनु विविधाः प्रान्तभाषा नवीना-
स्तत्राप्याङ्ग्ली भरतभुवने लम्भिता शास्तृभावम् ।
मन्ये तस्माद् विबुधभणितिं संस्कृताख्यामिदानीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥४॥

भृङ्गावल्या अनुनयमनाकर्ण्य, नालोच्य हंसी-
पङ्क्तेः प्रीतिप्रमुखमुदितं मानिनीं पद्मिनीं यः ।
वेशन्ताम्भोललितशयने न प्रबुद्धां न सुप्तां
धीरं वीक्ष्य स्पृशति शनकैः स श्रिये वोऽस्तु भास्वान् ॥५॥

संप्रज्ञाते स्थिरसुखसमे ज्योतिरेकं समाधौ
दर्शं दर्शं विरतकरणव्यापृतिः कोऽपि धन्यः ।
यां दृक्तारां श्रयति विमलां न प्रबुद्धां न सुप्तां
दोग्धुं शक्ता परम-कविताऽऽसारमेषा हि धेनुः ॥६॥

मातर्गङ्गे तरणितनया-श्याम-तेजो-वितान-
व्यामिश्राङ्गीं कुमुदविशदां ते निजीयाम्बुधाराम् ।
धन्यः को वा न खलु भजते न प्रबुद्धां न सुप्तां
चेतोमुद्रामखिलकलुषद्राविणीं हारिणीं ते ॥७॥

मातर्गङ्गे तव रसमयीं शाम्भवीं वीक्ष्य मुद्रां
यो वै धत्ते नयनयुगलीं न प्रबुद्धां न सुप्ताम् ।
मुक्तिस्तस्य स्पृशति चरणौ क्रीतदासीव, काशी-
वासी कश्चिद् गगनवसनो द्वित्वमायाति तस्मात् ॥८॥

सितं सत्त्वोद्रेकादसितमथ कोपादिकलना-
दथो रक्तं रागादिति गुणविलासैरविरलम् ।
अथाप्यस्मै तस्मै परमपुरुषायातिरुचिरं
विचित्रं त्रैलोक्ये जयति कविवाणीविलसितम् ॥९॥

रसोऽलंकारो वा गुणसमुदयो वा ध्वनिरिति
प्रसिद्धं तत्त्वं वा भवति यदि वा वक्रभणितिः ।
अनङ्गे यस्याङ्के मधुरतितरामेतदखिलं
तदौचित्योत्सिक्तं जयति कविवाणीविलसितम् ॥१०॥

दिनेशाक्षिज्वालामपि रतिपतिर्यत्र वपुषा
विहीनो नो किन्तु प्रथिमभरसौभाग्यरहितः ।
न शृङ्गाराश्लेषव्यसनविरहं नापि विकृति-
क्षितं तत् सोल्लासं जयति कविवाणीविलसितम् ॥११॥

यदच्छैकाकृष्ट-क्षिति-गगन-तत्तीर्ण-निखिल-
प्रपञ्चात्म प्रज्ञाप्रणयि विभु लावण्यलसितम् ।
तदेकं ब्रह्माख्यं जयति परमं तत्त्वमथवा
लसत्तत्सोदर्यं जयति कविवाणीविलसितम् ॥१२॥

पुरा या निस्यन्दि-प्रथम-कमल-स्पन्दि-मधुप-
स्वनोत्कम्पा पीता रहसि रसिकेनेद्धरतिना ।
इदानीं हा दैवात् प्रथिमविधुरे जीवनमरौ
प्रियाया मुग्धायाः श्रवसि यदि वाणी लसति सा ॥१३॥

किं चिन्त्यतेऽत्र भवता भवता सरोजे
भृङ्गाधिराज ! दयिताभिरुपास्य माध्वीः ।
दैवान्निदाघदिवसेष्वधुना क्षणार्धं
शाखोटकोटररजः समुपास्यते चेत् ॥१४॥

माकन्दनिर्झरितमुग्धमरन्दवीची-
राचम्य चर्चितपरागविभूषितेन ।
किं चिन्त्यतेऽत्रभवता तरुवल्लरीषु
पुंस्कोकिल ? द्विज न पल्लवमीक्ष्यते चेत् ॥१५॥

किं चिन्त्यते मृगपते ? मरुमारुतेषु
काँश्चित् क्षणान् रचितवत्सु विरोधमुच्चैः ।
पश्याग्रतो भगवती-करवाल-नील—
श्रीकं वनान्तरमिदं च मृगोच्चयं च ॥१६॥

अस्थीनि फेरव ? इमानि भवद्विधेभ्यो
भूयासुरात्मबहुमानविधायकानि ।
किं चिन्त्यते कलभ-कुम्भ-विमुक्त-युक्त-
मुक्तारतेर्मृगपतेर्न भयं भवद्भ्यः ॥१७॥

द्वारि स्थितेन निभृतानिभृतेन मुग्ध-
सौरभ्यलुब्धमधुपेन मुखाम्बुजेन ।
आकृष्य मामवशचित्तमहो कथं नु
क्षिप्रं कवाटघटनां कुरुषे चलाक्षि ?॥१८॥

मातुः स्तुतिः

मातस्त्वच्चरणारविन्दकिरणानादाय धन्यायते
पीठत्वेन सभाजितः सुरगणासेव्यः स चिन्तामणिः ।
धम्मिल्ले रचितप्रसूननिचयः कल्पद्रुमोऽसौ हवि-
र्धानी सा च पयोऽवनेजितपदा संबिभ्रतः स्वं यशः ॥१९॥

मातश्चित्तवितर्दिकामधिवसन्तीच्छामयूरी मम
प्रत्यग्रान् विषयाभिधान् विषधरान् संप्रेक्ष्य नृत्यत्यसौ ।
सूते किं च विचित्रपोतकगणं तत्रैव नृत्यत् स्थिरं
कोऽत्र स्यान्मृगयुर्विना तव शुभं दिव्यं कृपाविभ्रमम् ॥२०॥

मातर्मूर्ध्नि पतन्ति मे सरभसं चिन्तातुषारानलाः
शीता अप्यतिमेदुरा ज्वलयितुं त्वद्दत्तमेतद् वपुः ।
कश्छत्रं मयि धारयेदथ भवेत् को वा वसन्तोऽधुना
त्वत्पादांशुचयेन पीवरतनुं पीठाब्जधूलिं विना ॥२१॥

मन्दे मय्यभितः पतन्त्वविरतं दौर्भाग्यमेघोपलाः,
एतन्मे जरयन्त्वपक्वकणिशं क्षेत्रं च, नास्ति व्यथा ।
एतावत्तु विषायते मनसि यद् गान्धारराजात्मजा
जेत्री त्वां जननि प्रवत्सलतया दृष्टिं सुते तन्वती ॥२२॥

मातर्नास्मि शुकोऽनुवादकलया धन्यो, न वा पुण्ड्रको
निश्च्योतेऽप्यतिमात्रमात्मरहितो मौनैकवद्धस्पृहः ।
नास्म्येवामृतरश्मिरेव जडताक्लिष्टां सुधां धारयन्,
नागोऽप्यस्मि न वा द्विजिह्वविरुदो, दीपोऽस्मि ते ज्वालितः ॥२३॥

मातस्त्वद्भवने त्वदीयमधुर-स्फीत-स्मिति-स्वच्छता-
शीतांशु-प्रतिमांशु-राजि-तरल-स्वान्तोऽस्मि चन्द्रोपलः ।
ग्रन्थिस्तत्र परंतु कश्चन दृढो राराजते नो यतः
साकल्येन भवामि हन्त गलिते हैयङ्गवीनाग्रजः ॥२४॥

साहित्यं यदिदं विकीर्णविभवं सर्वत्र विभ्राजते—
ऽलङ्काराँश्च गुणाँश्च काँश्चन दधन्मातस्त्वयोल्लासितम् ।
एतत् किन्तु विभावमात्रमिह चेन्नो सा रसव्यञ्जना
मादृक्षे रसिके, वृथैव जननि त्वन्नाट्यलीला ततः ॥२५॥

अभाग्यदिविरो दिनं दिनमिदं मदीयं शिरो
घटोत्कचयति क्षिपत्यनलमेतदाकाशकम् ।
निगीर्णनिखिलातपा निजजनस्य विस्फूर्जथुं
विधौ प्रकुपिते सृजन्त्ययि दयाब्दमालायताम् ॥२६॥

प्रसृत्वरपुराकृतप्रबलपाक ! जल्पाक ! मां
विभीषयसि दारुणैः किमु तथा तथा वल्गितैः ।
निबोध मयि वर्त्तते त्रिपुरसुन्दरीदृक्छटा-
सुधाब्धिपरिखाऽथ तत्पदपयोजमञ्जीरता ॥२७॥

मया किमु कृतं पुरा किमु च साम्प्रतं चर्यते
तदक्षपटले लिखत्यवहितो यमस्याक्षिकः ।
यमस्तु मयि दाडिमं क्षिपति बीजमिच्छाशुके
पदोन्नतिकृते स्तवं रचयितुं जनन्यास्तव ॥२८॥

जगज्जननि तावके किमु करेऽस्त्यसौ पुण्ड्रको
जगत्त्रितयपर्वभिर्विधृतपिण्डकाडम्बरः ।
अहो विदितमम्बिके ! त्वमसि भीषिता मादृशां
पुराकृत-वराहकैर्विकट-पाक-दंष्ट्रोद्भटैः ॥२९॥

यदध्वरजसां कणानमृतवर्षिभिस्तर्षिभि-
स्त्वदंघ्रितलरोचिषे म्रदयति प्रकाशैः शशी ।
सुरद्रुविटपावली-शिति-वितान-गर्भ-स्थित-
प्रदीप्तकनकासना विजयतेऽम्बिकाऽसौ परा ॥३०॥


पुरारितपसि स्पृहां बलमलम्बुषावासिनि
म्रदिम्नि, कलनापरां स्मरति-कर्मतां तां स्मरे ।
उदित्वरविसृत्वर-ज्वरति-मात्र-पात्रायितं
रतौ च दधती जयत्यहह सा पराम्बारुचिः ॥३१॥

यदीयसमताकलालवदिदृक्षया वासवो
विरिञ्चशतवार्षिकं तप उपादिताक्ष्णां वने ।
अथापि च पुलोमजाञ्चलविमृष्टबाष्पः स्थितः
स्मरारिहृदयेश्वरी जयति साऽम्ब ते माधुरी ॥३२॥

त्वदंघ्रिकणिकालवं स्पृशति पद्मगर्भेऽपि यः
स्थितिं व्यधित वेदभूरिति स वन्द्यते पद्मभूः ।
अहो न खलु का कथा भवति तस्य यत्र स्मितं
शशाङ्ककुमुदार्दनं तव सुधाम्बुवाहायते ॥३३॥

सुरद्रुकुसुमावलीरचितशेखरा कामधुक्-
पयःकलशिकाशया कर्टिवलम्बिचिन्तामणिः ।
यदीयगृह-देहली-परिचर-क्रिया-कामनाऽ-
पराधभयमूर्च्छिता रतिरिमां स्तुमोऽम्बां पराम् ॥३४॥

वि० श्री० रङ्गनाथाचार्यः



जन्मतिथिः १५-१०-१९२३

अनवरतं श्रीरामानुजदर्शन-मीमांसाशास्त्राद्याकलनेन कालक्षेपं कुर्वाणाः प्रयागविश्वविद्यालये तमिलभाषायाः प्राध्यापकाः श्रीमन्त आचार्यवर्याः कालिदासादिविरचितकाव्यानामपि रसास्वादपरायणाः सन्तो यदा कदा काव्यनिर्माणेऽप्यभिनिवेशं बिभ्रति। एभिर्विरचितेषु पद्येषु कश्चन परमः प्रसादः समुल्लसति।

समस्यापूर्तयः

विद्यापीठे विबुधभरिते विद्यया द्योतमाने
मध्येसङ्घं विशति सहितं पण्डितं मन्यमानः ।
आस्ते वाणीविलसितमितो सम्भविष्यत्यवश्यं
पश्यत्यद्धा स्वगतधिषणां न प्रबुद्धां न सुप्ताम् ॥१॥

किं चिन्त्यते कमपि पद्यवरं विधाय
संश्रावयेति वचनं मधुरं निशम्य ।
सुप्तामिव स्थितवतीं प्रतिभां विबोध्य
यत्नं करोति भवतामिह मोदनाय ॥२॥

कामी कश्चित् प्रवसनशुचा क्लेशितात्मान्तरङ्गः
प्राणेभ्योऽपि प्रियतरसखीं पूर्णसौन्दर्यमूर्तिम् ।
सोत्कण्ठां तां स्वमिव मलिनां विह्वलाङ्गीं दिदृक्षु-
र्गत्वा पश्यत्यतिरभसतो न प्रबुद्धां न सुप्ताम् ॥३॥

आविश्चक्रे जगति निगमान् नित्यसत्तान् विरिञ्चि-
र्वाल्मीकिश्चाप्यवितथगिरा स्वादिकाव्यं वितेने ।
अन्ये चक्रुर्बहुविधकृतीः कालिदासादयोऽपि
सर्वं वाणीविलसितमिदं भाति विश्वम्भरायाम् ॥४॥

वि० श्री० रङ्गनाथाचार्यः

प्रबुद्धविवेकानन्दम्

पुरा कदाचित् किल वङ्गदेशे
वंशे प्रशस्तेऽवततार कश्चित् ।
अध्यात्मविद्यामतुलां स लेभे
श्रीरामकृष्णार्यगुरुप्रसादात् ॥५॥

नाम्ना नरेन्द्रस्य जगत्प्रसिद्ध-
प्रज्ञाविलासादिगुणोच्छ्रयस्य ।
बाल्ये यदत्यद्भुतमस्य वृत्तं
तदत्र किञ्चित् प्रतिपादयामि ॥६॥

पित्रार्जितां नाम न काचिदासी-
न्न वा स्वयं काञ्चिदवाप भूतिम् ।
अध्यात्मविद्याप्रवणैकचित्तो
धनार्जने नैव चकार बुद्धिम् ॥७॥

दारिद्र्यदुःखं महदापतिष्णु
सोढुं नरेन्द्रस्य न शुक्नवाना ।
माता कदाचित् तपसोपलब्धं
सुतं स्वमाहूय जगाद वाक्यम् ॥८॥

अङ्ग त्वदीयां परमार्थतत्त्व-
ज्ञाने प्रवृत्तिं प्रसमीक्ष्य कामम् ।
तुष्टाऽस्मि ते शीघ्रमसौ दयालुः
प्रसीदतु प्रार्थितसिद्धिदाता ॥९॥

अथापि किञ्चित्त्ववधेयमस्ति
त्वया विनीतेन चिरायुषाऽत्र ।
माता तवाहं विधवाऽस्मि सौम्य
स्वसार एतास्त्वविवाहितास्ते ॥१०॥

भ्राता न वा तेऽस्ति तथा समर्थः
कुटुम्बसंरक्षणकार्यजाते ।
तस्मात् त्वमेवासि कुटुम्बकार्यं
निर्वोढुमेकः कुशलो न चान्यः ॥११॥

पश्य त्वदीयप्रियसोदराणा-
मगाधपातालनिमग्ननेत्रम् ।
द्वितीयवस्त्रव्यतिरेकभावा-
दार्द्रेण वस्त्रेण परीतमङ्गम् ॥१२॥

न बन्धुवर्गो गणयत्यनाथा-
नस्मान् तथा भिक्षुजनांश्च नैव ।
अस्मद्गृहद्वारमुपाश्रयन्ति
मत्वा हि लभ्येत न किञ्चिदत्र ॥१३॥

दत्वा यथेष्टं प्रियबन्धुवर्गं
सम्भाव्य साऽहं स्वपतिप्रभावान् ।
क्षुधा परिक्लेशितसर्वगात्री
कथं न याचे स्वजनस्य मध्ये ॥१४॥

पुत्रस्य विद्यापरिपन्थिनौ द्वौ
पिता च मातेति च यः प्रवादः ।
सत्यापने तस्य तव प्रवृत्ता
माता न चान्यां गतिमीक्षमाणा ॥१५॥

तस्मात् प्रयत्नं कुरु वृद्धमातुः
सहोदराणामतिबालिशानाम् ।
संरक्षणे सौम्य चिराय जीवे-
त्युक्त्वा स्वनेत्रोद्भवमश्रमार्जत् ॥१६॥

श्रुत्वा नरेन्द्रोऽप्युपपत्तिमत्त-
द्वाक्यं जनन्या जलपूर्णनेत्रः ।
तस्थौ क्षणं स्वेदितसर्वगात्रः
पुनर्बहिस्साधयति स्म तूष्णीम् ॥१७॥

ततस्स गत्वा स्वगुरोस्समक्षं
निवेदयामास विषण्णचित्तः ।
गृहे स्वकीयस्य जनस्य सर्वां
परिस्थितिं कष्टतरां बहुज्ञः ॥१८॥

अज्ञानगाढान्धतमोपहन्त्रे
ज्ञानैकरूपाय नमो नमस्ते ।
त्वत्पादमूलात् समवाप्तविद्यः
विज्ञापयत्यार्थवरः शृणोतु ॥१९॥

निमेषमात्रं न भवमत्क्षुधार्तं
शरीरमस्य प्रजुगोप माता ।
परं स मूर्खः स्वयमात्मविद्यां
विचिन्तयन् मातरमुज्जहाति ॥२०॥

प्रत्यक्षदैवं जननीति वाक्यं
पठन् तदर्थं न करोति चित्ते ।
प्रसूं निराहारकृशां विलोक्यो-
पेक्षेत कोऽन्यः कठिनान्तरात्मा ॥२१॥

तस्माद् गुरो मेऽनुगृहाण पूर्वं
यथा न दारिद्र्यहतः प्रदूये ।
पश्चात्तु कामं प्रविचिन्तयेयं
वेदान्तविद्यां स्थिरभूतचित्तः ॥२२॥

शिष्येण दारिद्र्यविहीनधैर्ये-
णाभाषितं श्रीयतिराट् निशम्य ।
उवाच वाचं स मुनिप्रवेको
मुखेन मन्दस्मितशोभितेन ॥२३॥

युक्ता तवेयं परिहारचिन्ता
मात्रादिदुःखस्य महत्तरस्य ।
तथा हि पूर्वं मनुरब्रवीत् यद्
भर्तव्य एव स्वजनः कथञ्चित् ॥२४॥

तथाऽपि नाहं प्रभुरस्मि सौम्य
त्वया समाकाङ्क्षितवित्तदाने ।
परं तु सर्वेश्वरसन्निधिं त्वं
गत्वा तमभ्यर्च्य वरं वृणीष्व ॥२५॥

तथेति तस्य प्रतिगृह्य वाचं
शुभां नरेन्द्रो भगवन्निवेशम् ।
जगाम सम्प्रार्थयितुं स्वकीयं
दारिद्र्यदुःखं व्यपनेतुमीशम् ॥२६॥

देवालयात्तं विनिवृत्तमाह
श्रीरामकृष्णार्यगुरुर्मुनीन्द्रः ।
नरेन्द्र तेऽभीष्टफलप्रदानात्
सम्भावितस्त्वं हरिणेति मन्ये ॥२७॥

अशेषसंपज्झरिदानशीलं
सर्वेश्वरं प्राप्य न कञ्चनार्थम् ।
सम्प्रार्थये किन्तु मनो न जाने
किं वा समाकाङ्क्षदिति प्रमुग्धम् ॥२८॥

सत्यं प्रवृत्तिर्मम निन्दनीया
मन्ये तु माता मृतकल्पभूता ।
इत्याभणन्तं नयनाम्भसार्द्रं
मध्ये निरुध्यार्य उवाच वाचम् ॥२९॥

जानामि चित्तं तव पूर्वमेव
मा भूरतिक्लेशविहीनधैर्यः ।
सर्वस्वदानोद्यतभूमिपालं
याचेत किं जीर्णपटं विवेकी ॥३०॥

तस्मात् त्वं निहितमना भवादिदेवे
नैवासौ त्यजति हरिस्स्वभक्तवृन्दम् ।
उत्कृष्टां गतिमपि यः प्रभुः प्रदातुं
देवोऽयं किमु न दिशेत् धनादिभोगान् ॥३१॥

शिवदत्त चतुर्वेदी

काशीहिन्दूविश्वविद्यालये संस्कृतसाहित्यस्य प्राध्यापकाः श्रीचतुर्वेद-महाशया हृदयेन कवयः, बुद्ध्या साहित्यशास्त्रविचारप्रगल्भाः सन्ति। हृदयस्य कयाचिद् अन्तरन्तरालोडनं विदधानयैव भावनया समुद्वेजिता इमे यत्किञ्चि-ल्लिखितुं प्रवर्तन्ते। सहृदयानां विदुषां च सदसि पठितुमेतैर्नाधिकानि निरति-शयभावभरितानि पद्यानि लिखितानि। स्वरचितपद्यानां कश्चन संग्रहः प्रकाश्येतेति नैतेषामभिरुचिस्तथापि गोस्वामितुलसीदासमवलम्ब्यार्याच्छन्दसोप-निबद्धमेभिः काव्यं निरमायि तच्च विद्वद्भिः सहृदयैश्चाभिनन्दितम्, उत्तरप्रदेश-शासनेन पुरस्कृतञ्च।

समस्यापूर्तयः

अमन्दानन्दानां मधुमधुरिमाणं प्रकटयन्
वसन्तोऽयं कान्तः परिमलसहस्रैः परिवृतः ।
रसोन्मत्तालीनां परिमिलनसौभाग्यविशदं
प्रमोदैरामोदं तरलयति वाणीविलसितम् ॥१॥

कवीन्द्राणामेतन्नवनवमहोदारचतुरं
न यत्रास्ते काचिद् विरतिकणिकायाः कलुषता ।
न वा भावाभावैर्मलिनयति यत् स्वान्तममलं
तदेतत्सर्वस्वं प्रचुरयति वाणीविलसितम् ॥२॥

नवीनोन्मेषाणां सदनमथ रम्योपनिषदां
निधानं सौजन्यामृतरसभराणां पुनरिदम् ।
पिधानं मोहानां करणगणसन्तर्पणपर-
मसारे संसारे शरणमिह वाणीविलसितम् ॥३॥

नवीनं सौभाग्यं सफलयितुमत्यन्तसरसं
निवर्तन्ते भूयः सकृदपगता नैव विषयाः ।
परन्तु स्वच्छन्दामृतसरसि सन्मज्जनविधौ
करालम्बं देयात्प्रचुरतरवाणीविलसितम् ॥४॥

यत्र चर्चाऽस्ति सर्वत्र गङ्गातटे
देव देवस्य तत्रापि किं चिन्त्यते ॥५॥

मज्जनं यत्र जातं त्रिवेणीजले
तत्र संसारधाराऽथ किं चिन्त्यते ॥६॥

गीतये स्तूयते दृश्यते स्पृश्यते
माधवो यत्र तत्रापि किं चिन्त्यते ॥७॥

सज्जनानामसौ संगमो दुर्लभो
यत्र संजायते तत्र किं चिन्त्यते ॥८॥

चिन्त्यतां कापि काव्यस्य धारा नवा
या पुराणी तु सा सैव किं चिन्त्यते ॥९॥

वर्णिता कापि कालस्य चित्रा गतिः
सा पुरो विद्यते ब्रूत किं चिन्त्यते ॥१०॥

दिव्यदेवाधिदेवांशभूता वयं
गीतया गीयते नैव किं चिन्त्यते ? ॥११॥

नन्वियं धारणा नाति दूरं गता
सम्मुखे जह्नुकन्यास्ति किं चिन्त्यते ॥१२॥

जागरूको जनानां यदा मानसो
रामबाणोऽयमाभाति किं चिन्त्यते ॥१३॥

धूर्जटेर्धूलिमासाद्य मोदामहे
या स्थितिर्भाविनी सापि किं चिन्त्यते ॥ १४॥

लुप्यते वेदना कान्दिशीकी स्वयं
दिव्यलीलाप्रभावोऽपि किं चिन्त्यते ॥१५॥

उन्मादाम्बुदमालिकासु विलसच्छम्पासहस्रावृतं
शैत्योद्दामविधूतगात्रविभवानालम्ब्य नीराजितम् ।
चण्डोद्दण्डमरीचिजालविगलल्लावण्यसन्तापकं
पश्यामः सततं विमुग्धमनसा कालस्य लीलायितम् ॥१६॥

शक्तिः क्षीणतमा कफप्रचुरता कम्पस्य सर्वाङ्गता
मन्दत्वं नयनद्वये श्रवणयोः शब्दग्रहापाटवम् ।
अस्थ्नां सञ्चय एव देहपदभाग् बुद्धौ प्रमादो महान्
हंहो वार्धक ! पूर्णतां त्वयि गतं कालस्य लीलायितम् ॥१७॥

एतच्छास्त्रनिषेवणाधिकफलं मुद्राभिधानं मुदा
मुद्रालाभमवाप्य जीवनमिदं सौख्यास्पदं जायते ।
मुद्राया अवमूल्यने सति कियान् कोलाहलो वर्धते
मुद्रालाभमपास्य नूतनयुगे नैवास्ति लाभो महान् ॥१८॥

आकाशेऽम्बुदमालिकेव दिवसे सन्ध्यात्रयीवांशुमद्-
धाम्नीवेन्दुगभस्तयोऽब्धिसलिले तुङ्गास्तरङ्गा इव ।
यस्मिन् विश्वमुदेति यत्र रमते यत्रैति चास्तं पुन-
र्नूनं तस्य पयोदनीलमहसः पूजासु लाभो महान् ॥१९॥

शिवजी उपाध्यायः



जन्मतिथिः-३।३।१९४३ (वि०सं०२०००)
जन्मस्थानम्—पण्डितपुर, मीरजापुर, उत्तरप्रदेशः ।

साम्प्रतं सम्पूर्णानन्दसंस्कृतविश्वविद्यालये साहित्यस्याध्यापनकार्यरता उपाध्यायमहाशया बाल्यादेव कविता-निर्माणे प्रवृत्ताः सन्ति । परिमितेनैव कालेनैभिः प्रस्तुतेन नानाकाव्यनिर्माणेन स्वकीयसहजप्रतिभया विदुषां सहृदयानाञ्च गोष्ठ्यः प्रभाविताः । एतेषां काव्येषु प्रवाहमयी भाषा निरन्तरानुप्राससंवलितां कामपि प्राचीनां सरसनिर्माणकलनां स्मारयति । गीतकाव्य-नाटकादीनामपि निर्माणेऽभिरुचिमिमे बिभ्रति । 'परमाणुभारतं' नाम प्रबन्ध-काव्यमधुना निर्माणाधीनम् ।

समस्यापूर्तयः

क्षामक्षामां प्रियविरहजां क्लान्तिमन्तर्दधानां
गाढध्वान्तग्लपितवदनां नेतरेणोपभुक्ताम् ।
पङ्के लीनां नवकमलिनीं लुप्तलावण्यलीलां
कीलालेऽले ! दशसि दशनैर्न प्रबुद्धां न सुप्ताम् ॥१॥

भाषावादप्रवादैः प्रविचलितपदां प्रेक्षकैः प्रेक्षमाणां
हृद्यां विज्ञानविद्याविलसितविभवां दिव्यतत्त्वानवद्याम् ।
आराष्ट्रं भासमानां जगदखिलमिदं भूयसा भूषयन्तीं
वन्दे तां वाचमद्य प्रमथितहृदयां न प्रबुद्धां न सुप्ताम् ॥२॥

वन्दे मुग्धाङ्गवल्लीं निशि निशि लुलितस्निग्धसस्यैकवेणीं
प्रालेयोत्पातशुष्यत्कुवलयविपिनप्रान्तरेषूत्तरन्तीम् ।
पुष्पोद्यानेषु रम्येष्वथ नवललताकुञ्जपुञ्जेषु भान्तीं
वासन्तीं सौम्यलक्ष्मीं कलितकिसलयां न प्रबुद्धां न सुप्ताम् ॥३॥

कुत्राप्युत्तममध्यमाधमदिशा निर्वाचनान्ते जये
प्राप्ते सत्यथ राज्यशासनपदं प्राध्यासिते प्राञ्जसा ।
प्रान्तेष्वद्य तथा च केन्द्रशिरसि प्राप्ताधिकारोद्धुरै-
र्वाचाटैः किल नेतृभिश्च बृहते राष्ट्राय किं चिन्त्यते ॥४॥

प्रेम्णा वक्रमवेक्षिते नवनवस्नेहेन संलापिते
हस्ताग्रेण विलव्य सद्धिप्रतवचःसारेण संस्नापिते ।
संगत्य प्रणिपातसम्भ्रमविधौ सम्पादिते सादरं
वारं वारमुपस्नुते प्रमुदिते मित्रे तु किं चिन्त्यते ॥५॥

बाले ते ह्यनुरागरञ्जितदृशो लब्ध्वाऽऽस्पदं सम्पदं
सम्प्राप्य स्वयमद्य नेन्द्रपदवीं सोऽहं समीहितराम् ।
हृत्कुञ्जाङ्कुरितं समुज्ज्वलनवस्नेहाश्रुभिः क्षालितं
नव्यं प्रेमतरुं समाश्रितवतो मे चण्डि ! किं चिन्त्यते ॥६॥

श्रुतिष्वन्तर्गीतं स्मृतिषु च पुराणेष्वनुगतं
कवीनां काव्येषु ध्वनितमनु गीतेष्वनुदितम् ।
पदार्थैषून्नीतं दिशि दिशि विरावेषु विसृतं
समस्तं व्यस्तं वा निखिलमिह वाणीविलसितम् ॥७॥

किमार्षं किं श्रौतं किमु च विवृतं स्मार्तसुकृतं
किमत्र प्राशस्त्यप्रणिहितमथो किं सदमृतम् ।
किमाराध्यं ध्येयं किमु च कमनीयं कवयतां
सतामन्तर्ज्योतिः किमिह ननु वाणीविलसितम् ॥८॥

सर्वं हि तत् संस्कृतम्

यद् वेदेषु निवेदितं यदुदितं स्मृत्यागमेषूद्गतं
यद् गीतोपनिषत्सु यच्च पठितं नानापुराणेष्वपि ।
यद् रामायणसत्कथासु भणितं काव्येषु यत् कीर्तितं
लोकेषु प्रथितं यदस्ति महितं सर्वं हि तत् संस्कृतम् ॥९॥

सृष्टं यद् विधिना यदत्र मुनिना दृष्टं च वाल्मीकिनाऽऽ-
दिष्टं जैमिनिना च यद् यदनिशं जुष्टं च देवर्षिणा ।
घुष्टं यन्मनुना शुकप्रभृतिना पिष्टं तपश्शालिना
पुष्टं पाणिनिना कृतं यदधुना सर्वं हि तत् संस्कृतम् ॥१०॥

यद् यद् धर्मगतं यदर्थविहितं यच्चात्र कामेप्सितं
यन्मोक्षप्रमितं यदस्ति परितोऽप्यैश्वर्यसम्पादितम् ।
यद् वा साधु सुभाषितं यदुचितं यत्किञ्चिदुच्चैःस्थितं
यच्चान्यत् सुपरिष्कृतं त्रिभुवने सर्वं हि तत् संस्कृतम् ॥११॥

येनाद्यावधि सत्कृतं च सुकृतं दूरीकृतं दुष्कृतं
येन प्रेम पुरस्कृतं मुहुरहो स्वर्गीकृतं भारतम् ।
येनास्तित्वमलङ्कृतं बहुविधं तत्त्वं च साक्षात्कृतं
येनैतत् प्रकृतं चिरादुपकृतं सर्वं हि तत् संस्कृतम् ॥१२॥

यन्नूनं प्रथते यदाप्तमभितस्त्रैलोक्यमुत्कण्ठते
यस्मै त्रैदशवैभवं स्पृहयते यत् सद्यशो वर्द्धते ।
सौख्यं यत्तनुते धियां च सुधियां यच्च श्रियामुन्नते
भालेऽलङ्कुरुते पदं यदमितं सर्वं हि तत्संस्कृतम् ॥१३॥

यस्मिन् भान्ति विधोः कला इव चतुःषष्ट्यङ्कितास्ताः कला
हृद्या यत्र च सा चतुर्दशविधा विद्या च विद्योतते ।
यस्योपान्तगता सखीव महिता सत्सभ्यता संस्कृति-
र्विश्वं मित्रमिवास्ति यस्य नियतं सर्वं हि तत् संस्कृतम् ॥१४॥

यद् गायन्ति दिवानिशं दिविषदो ब्रह्मादयो देवता
यस्मान्निर्गलितं पिबन्ति मुनयो ज्ञानामृतं शाश्वतम् ।
नृत्तान्ते नवपञ्चवारमकरोद् ढक्काध्वनिं शङ्करो
यस्मिन् यच्च शुभं करोति सततं सर्वं हि तत् संस्कृतम् ॥ १५॥

यस्याकर्णनमात्रतोऽपि कलुषं नश्यत्यलं प्राणिनां
यस्याध्यापनतस्तथाऽध्ययनतः कल्याणमास्ते नृणाम् ।
साहित्यं विपुलं च यस्य विमलं संगीतकं मार्मिकं
भारत्याः स्तनयुग्मकं सुललितं सर्वं हि तत् संस्कृतम् ॥१६॥

श्रीनारायणमिश्रः



काशीहिन्दूविश्वविद्यालये कला-संकाये संस्कृतस्याध्यापकाः श्रीमिश्रा भारतीयदर्शनस्य, विशेषेण न्याय-व्याकरणदर्शनयोः प्रौढं पण्डित्यं बिभ्रति । वैयाकरणा नैयायिकाश्च काव्यरचनायां न तथा साफल्यमवाप्नुवन्तीति लोकप्रवादः श्रीमिश्राणां काव्यनिर्मितेराकलनानन्तरं सर्वथा सारहीन एवेति प्रतीतिमायाति । यदीमे शास्त्रविषयकं गम्भीरचिन्तनं किञ्चिदवरुध्य काव्यनिर्माणे प्रवृत्ताः स्युस्ततो महनीयेन निर्माणेन विदुषः सहृदयांश्च चमत्कारभरितान् कर्तुं शक्नुयुरिति निश्चितम् ।

समस्यापूर्तयः

उद्यन् भास्वान्नभसि विसृजेच्चन्द्रिकां सुप्रबुद्धां
सद्यो विद्वान् सदसि विसृजेद्युक्तिशक्तिं प्रसुप्ताम् ।
मायां धीमान् महसि विसृजेत् सुप्रबुद्धां च सुप्तां
वामां कामी रहसि विसृजेन्न प्रबुद्धां न सुप्ताम् ॥१॥

वाणीविलसितमभिमतमद्भुतमुपचितमिह संसारे ।
व्यासभासकविकालिदासभवभूतिकमलकासारे ॥२॥

आरब्धे नवयौवनेऽत्र सहसा भ्राता निपातं गतो
वात्सल्यातिशयं विहाय महितस्तातोऽपि यातो दिवम् ।
प्राणेभ्योऽपि गरीयसी ननु सुता बाल्याप्यकाले हृता
जाने न व्यथितं जनं व्यथयितुं दैवेन किं चिन्त्यते ॥३॥

किं चिन्त्यतेऽत्र भवता भवतापहारिन्
भ्राता हतो व्यपगतश्च पिताप्यकाले ।
प्राणादपि प्रियतरा च सुता विलुप्ता
नैतावतापि हृदयं सदयं कथं ते ॥४॥

दिवङ्गता

या तर्जिता भृशमपीतरकार्यहेतो-
र्मोदं स्वबालललितैर्लपितैर्व्यथतानीत् ।
सैवाद्य वत्सलतयापि विचिन्तिताहो
आभा कथं नयनगोचरतां न याति ॥५॥

श्रुतिसुधां वसुधामधिसिञ्चती
मृदुसुधामधुरैर्मधुरैः स्वरैः ।
हृदि मुदं सृजती हसितैः सितैः
क्व नु गतानुगताद्य सुता मम ॥६॥

सोमे मनोऽसुः पवने सुताया-
स्तनुर्धरण्यां नलिने मुखश्रीः ।
लीयेत, नक्तन्दिवमेकरूपं
शुचि स्मितं कुत्र लयं लभेत ॥७॥

भूयो भूयो विनयसहिताः प्रार्थयामो विपन्ना
निद्रे नास्मन्नयनयुगलं प्रेरितापि प्रपद्येः ।
येन स्वप्ने निशि च दिवसे जागरायां समन्ता-
दाभाभासि क्षणमपि मनो नो भवेत्तद्विलग्नम् ॥८॥

कथय कथय वत्से सम्भ्रमाद्विभ्रमाद्वा
स्वत उत परतो वा विप्रियं किं कृतं ते ।
यदसकृदुदितापि प्रेक्षसे नैकदाऽपि
विरहविहतसारं भारभूतं मुखं नः ॥९॥

अद्यप्रभृत्यहह पुत्रि वहिर्व्रजन्तं
स्नेहेन का कथय मामनुयास्यतीति ।
प्रत्यागतं पुनरपि प्रवितत्य हस्तौ
देहीति वाचममृतामभिधास्यतीति ॥१०॥

चिन्ताशतातुरतयातिविकुण्ठिताङ्गो
लोलैः स्ववालचरितैः परिरञ्जयन्ती ।
हा पुत्रि कुत्र परिहृत्य विपत्समुद्रेऽ-
स्मानार्त्तिभारभिदुरान्ननु निर्गतासि ॥११॥

पूर्वं हरत्रिपुरदाहसमुद्भवेन
नैवोदितं यदतिभस्मसमुच्चयेन ।
किन्ते मितेन भसितेन ममात्मजाया-
स्त्रैलोक्यराज्यतिलकं प्रभवेल्ललाटे ॥१२॥


दत्तां श्रियं प्रतिहरन्नघमर्जयित्वा
लोको भवेन्नरकभागिति शास्त्रवार्ता ।
प्रत्तां स्वतः कथय निर्घृण ! मत्प्रियाभां
हृत्वा गमिष्यसि कथं यमयातनान्तम् ॥१३॥

अज्ञः कुकर्म कुरुतेऽखिलजीवलोक
एतच्छ्रुतिस्मृतिषु संगदितं त्वयैव ।
वालापमारणकदाचरणप्रवृत्ता-
त्त्वत्तोऽपि देव ! वद कोऽज्ञतरोऽस्ति जीवः ॥१४॥

नूनं जनार्तिकरणाद्धरणात् प्रियाणां
त्वं प्राप्तवानसि हरीत्यभिधानमीश !
लोकत्रयार्तिहरणात् कथयन् हरिं त्वां
स्वायम्भुवो मनुरपीह विमूढ एव ॥१५॥

त्रातुं स्वभक्तमवधीः कशिपुं रिपुं तं
लङ्काधिपं च मिथिलेशसुतागमाय ।
आभां प्रभां मम दशोर्वृतपञ्चमाब्दां
मोहान्निहत्य वद किं फलमाप्तवांस्त्वम् ॥१६॥

सुबोधचन्द्र पन्तः



जन्मतिथिः ७-७-१९३४ ई० (वि० स० १९९१) निवासः—जगतगञ्ज, वाराणसी ।

झांसीश्वरीचरिताभिधमहाकाव्यस्य रचयिता भारविरिवार्थगौरवस्य परिपालकः सचेताः कविः पन्तमहोदयः विद्यापीठेऽस्मिन् कार्यालयाधीक्षकपदमलङ्करोति । अयं हि स्वान्तःसुखाय कविकर्मणि तथैव मनः प्रणिदधाति यथा गणितसमस्यानां समाधानेषु बुद्धि रमयति । अनेन प्रणीताः कतिपयेषां संस्कृतमहाकाव्यानां हिन्दीपद्यानुवादा हिन्दीमहाकाव्यानां संस्कृतपद्यानुवादाश्च प्राकाश्यमपेक्षन्ते ।

समस्यापूर्तयः

हाहाकारं भरतधरणावास्यमास्यं न धत्ते
वर्धिष्णूच्चैर्विरहरजनीतुल्यमालोक्य मूल्यम् ।
सर्वः पश्यत्यनुदिनचितोदग्रचिन्ताजडत्वाद्
दीनां तान्तामहह वनितां न प्रबुद्धां न सुप्ताम् ॥१॥

न प्रबुद्धां न सुप्तामलं पद्मिनीं
क्षीणसूर्ये विलोक्याम्बुवाहैः क्षणे ।
न स्मरेदर्द्धमीलद्दृशं कः प्रियां
यो विलम्बागमैकस्वभावो निशि ॥२॥

किं चिन्त्यते निखिलकामदुघो यदास्ति
प्रच्छन्नमूर्तिरुपरि स्थित एव कल्पः ।
सद्धर्मबुद्धिरुदिता यदि तत्क्षणात्त्वं
वीक्षस्व पूरितमशेषमनीषितं ते ॥३॥

किं चिन्त्यन्ते कविमणे सदसि प्रभूतं
तन्त्रं कृतं सरसमस्ति न तन्न मन्ये ।
जाग्रत्स नो नवविधो रस एव विज्ञ
ज्ञातः सुखिन्नमुख हन्त न षड्विधोऽपि ॥४॥

किं चिन्त्यते रसकलाः सकलात् तदिन्दो-
र्यूना हि षोडशकलानिचयात्प्रसिद्धात् ।
तत्पूरकः खलु सुधामदहा प्रतीक्षा-
संज्ञो रसोऽन्यरसकुञ्जरसिंहराजः ॥५॥

दुरापं यत्ख्यातं सुलभमिह तत्संसदि परं
कवीनामुद्दामं सुशुचिरुचि वाणीविलसितम् ।
न धारासारेण प्रतिपलमहो वर्षति सुधां
बुधा नानारूपां नवरसमयीं कामपि नवाम् ॥६॥

स्फुटकानि


वहसि किमिह दर्पं हन्त कन्दर्पमाप्य
विरहिदहनदक्षः सन् वसन्तोऽग्रकर्मा ।
मधुरिति न दलेत् त्वामद्य गङ्गादिनाथो
मदनमपि च विष्णुप्रीतिजुष्टः स रुद्रः ॥७॥

के कोरका नो सुमनस्त्वमाप्ताः
के पल्लवा नो तरुणारुणत्वम् ।
उद्दामभं नोल्लसति प्रकामं
तद् यौवनं कान्तवनावनीकम् ॥८॥

द्रुमः पृथिव्या कलिका च तेन
पुष्पं तया प्रस्तुतमस्ति कम्रम् ।
तेनाप्यमन्दो मकरन्दसिन्धु-
र्निमज्जिता येन धृतिभसत्ता ॥९॥

लता सदालिङ्गति वृक्षराजं
तां सोऽपि हस्तं विटपं प्रसार्य ।
पुष्पश्रियं भृङ्गवरश्च सा तं
लोकोऽद्य नालिङ्गनमात्ररीतिः ॥१०॥

हरिदत्त शर्मा



जन्मतिथिः—२७-६-१९४८ ई० (वि० सं० २००५) जन्मस्थानम्—हाथरस, अलीगढ़, उ० प्र० ।

प्रयागविश्वविद्यालयस्य संस्कृत-विभागेऽध्यापनकार्यरताः श्रीशर्माणो न केवलमात्मनः प्रकटतो व्यवहारेण कवयः परं स्वजीवनेनापि सरसं कवित्वं प्रख्यापयन्ति । एतेषां काव्यनिर्माण-दृष्टिर्यथा सूक्ष्मा तथैव नूतनाऽपि । एभिः सान्द्रमन्देन स्वरेण गीयमानानि पद्यानि सहृदयेषु पुष्कलं प्रभावमातन्वन्ति ।

सुमधुराणां रसभावगर्भाणां शब्दानां चयनमेतेषां काव्यस्य वैशिष्ट्यम् । प्रयागस्योदीयमानेषु संस्कृतकविषु सुतरामिमेऽग्रासनार्हाः ।

समस्यापूर्तयः

मा गा दूरं प्रिय मदधुना ह्यागतस्त्वं चिरेण
वर्षाऽयाता नयनसलिलैः प्राग् वसन्तो व्यतीतः ।
इत्थं शून्ये प्रविततकरां काञ्चिदाश्लेषकामां
कान्तः स्वप्ने मिलति रमणीं न प्रबुद्धां न सुप्ताम् ॥१॥

मेघाङ्के दिवि दामिनीविलसितं सङ्गं धराकाशयो-
र्वासन्तीलतिकासु रागमधुरे नृत्यं द्रुमालिङ्गनम् ।
प्रेयांसं विमलानिशाभिसरणं सिन्धौ सरित्सङ्गमं
दृष्ट्वा यौवनखेलनं हृदि ततो मुग्धे नु किं चिन्त्यते ॥

ब्रह्माण्डो विपुलः कुतः समुदितो मेघाः सरित्सागराः
कस्मै कं वितरन्ति किं शशिरवी नीराजनादीपकौ ।
वायुर्वाति फलन्त्यहो द्रुमलताः पुष्पे कथं रञ्जनां
भो भो चिन्तक ! चित्रसृष्टिविषये चेदं न किं चिन्त्यते ॥३॥

स्वतन्त्रं साम्राज्यं विधिनियमहीनं विरचयत्
स्फुरद्वह्निज्वाला हिमकरकरेभ्यः प्रकटयत् ।
सुतीव्रे कारुण्ये विमलरसधारां प्रवलयत्
सृजन्नव्यां सृष्टिं जयति कविवाणीविलसितम् ॥४॥

[१]आक्रान्ताः खलराहुभिः कुपथगैः सद्धर्मशीतांशवः
पापाचारशिखी प्रयाति सुकृतं ज्वालालिभिर्ज्वालयन् ।
धर्मो ग्लानिमुपैति रोदिति धरा गीता गुहां गच्छति
दृष्ट्वाप्यत्र विभो ! विबोधसमयं शेषे नु शेषे कथम् ॥

रामः पाण्डुसुता नलोऽधिकबलो राजा हरिश्चन्द्रको
दौर्गत्यं प्रथमं गताः सुबलिनो राणाप्रतापादयः ॥
साफल्यं परमापुरत्र सकलाः सङ्घर्षशीला जनाः ।
पश्यन्तो द्रुतकालचक्रचलनं तिष्ठन्तु धीराः क्षणम् ॥

साकूतैः सविलासरागभरितैस्तीक्ष्णैरपाङ्गैरहो
बाला वल्लभमेकमाह्वयति सा क्रीडाकलालालसा ॥
तन्वङ्ग्या धृतलाञ्छनाञ्जनदृशश्चन्द्राननान्निःसृतां
लावण्ये रसिकश्चकोरचतुरश्चायाति पातुं सुधाम् ॥

गीतम्

अवनिरङ्गकृतशतशतभङ्गैः सलिलगतैरुत्तालतरङ्गैः ।
कृतनिजखेलप्रसारं पश्यत पारावारमपारम् ॥

---

१. इतस्त्रयः श्लोका गङ्गानाथझाजन्मशताब्दीसमारोहावसरे प्रणीताः समस्यापूर्तिरूपाः सन्ति ।

दिशि दिशि विलसति तीव्रजवेन लहरीणामुच्छलनम्
जलनिधितीरं गहनगभीरं धत्ते हरहरध्वननम् ॥
कूर्दति धावति चलति सवेगं सलिलं स्पृष्ट्वा पारम्
पश्यत०..................

नवयुवतीनां जलकन्यानां सोल्लासं ध्वनिहेला ।
तीरस्पर्शानन्तरधावनमनवरतेथं खेला ॥
भवति यथा कैशोर्यकालिकी क्रीडा वारं वारम् ।
पश्यत०..................

श्वेततन्तुमयरज्जुनिर्मितामधिरुह्य द्रुतदोलाम् ।
सलिलसुन्दरीगणो यथायं विरहति केलिविलोलाम् ॥
सघनयौवनं नृत्यति नूनं लब्धोत्प्लावनभारम् ।
पश्यत०..................

सिन्धुपतिः फेनिलप्रस्तरणं धवलं स्वं रतिशयनम् ।
रचयति तटिनीप्रियाजनेभ्यः सामन्त्रणरवगहनम् ॥
रसमयहृदये भावतरङ्गाः संस्फुरन्ति सविकारम् ।
पश्यत पारावारमपारम् ।